Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# संस्कृतमन्दाकिनी

(अप्रेल्- सप्ताम्बर २०२४)

**मार्गदर्शक:**

डॉ. सदानन्ददीक्षित:

**मुख्यसम्पादक:**

डॉ. विपिनविहारी शतपथी

**सम्पादिका**

डॉ.सागरिका भट्टाचार्या

## लोकभाषाप्रचारसमिति:

पुरी- ७५२००१

Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# संस्कृतमन्दाकिनी

**(लोकभाषाप्रचारसमितेः षाण्मासिकसाहित्यपत्रिका)**

# SAMSKRITAMANDAKINI

(Half-yearly literary Journal of Lokabhasa Prachara Samitih)

**प्रकाशिका**

**लोकभाषाप्रचारसमितिः**

**प्राप्तिस्थानम्**

सरस्वतीविहारः

बरपदा, भद्रकः. ओडिशा- 756112

दूरभाषम्- **9439953858, 7978080473**

**मुद्रकः**

महापात्रप्रिण्टिङ्ग प्रेस्, भुवनेश्वरम्

**प्रकाशनवर्षम्**

**अप्रेल्- सप्ताम्बर २०२४**

मूल्यम्- ५०/-(पञ्चाशत्रूप्यकाणि)

**(नवदेहलीस्थ केन्द्रीयसंस्कृतविश्वविद्यालयस्य आंशिकार्थसहयोगेन प्रकाशिता)**

**(Published with partial financial asistance from Central Sanskrit University, New Delhi)**

Printed and published by Sri Bibhuti Naranyan Kar, General Secretary on behalf of The Lokabhasha Prachara Samitih, Puri

Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

**सम्पादकीयम्**

# वस्तुवाद: विलयकारणम्

एकदा भारतवर्षे चार्वाक: नाम्ना वस्तुवादिदार्शनिक: आसीत्। तन्मते वाह्यवस्तुस्थित्यनुसारं सर्वं ज्ञानं तत्त्वमिति। तज्ज्ञानं प्रत्यक्षप्रमाणेन एव ग्राह्यम्। वेदादिशास्त्रमप्रमाणम्। वस्तुत: तु भारतीया: नैव वस्तुवादिन:। अत: कालक्रमेण भारते चार्वाकदर्शनस्य पतनं जातम्। परन्तु विंशशताब्द्याम् इयं वस्तुवादिचिन्ताधारा पुनरुत्थापिता। चार्वाकस्तु ज्ञानमात्रे वस्तुवादी आसीत् परन्तु साम्प्रतं कर्मसु चिन्तासु बुद्धिषु व्यवहारेषु च सर्वे वस्तुवादिन: सञ्जाता:। अस्य वादस्य मूलकारणं भवति विज्ञानं शिल्पञ्च। अनेन विज्ञानेन शिल्पेन च जनगणा: यादृशा: उपकृता: ततोऽधिका: चिन्ताकुला:, तेषां कुपरिणतिहेतो:। १९९८ तमे वर्षे बहुजना: प्रचण्डरौद्रतापात् मृता:। ऐषमोऽपि तादृशी अवस्था भविष्यतीति विभिन्नगणमाध्यमत: बहुश: सूचना प्राप्यते। किमर्थम् एवं प्राकृतिकवैचित्र्यम्? परंब्रह्मण: इङ्गितेन निर्मितम् इदं जगत्, अस्य कथं विलक्षणम्? एष: वस्तुवादस्य कुप्रभाव: एव। वैज्ञानिका: कथयन्ति इदानीं पृथिवीं परित: संलग्नात् ३५० किलोमिटर परिमितवायुवलयात् ९ किलोमिटरवायुवलया: संकुचिता:। अस्य वैचित्र्यात् चलितवर्षे(२०२५) प्रखरग्रीष्मप्रवाह: भविष्यति। अस्य कारणं भवति शिल्पनिर्गतकृष्णधूम: वन्यसंहारश्च।तत्र कृष्णधूमनिष्क्रमणं मुख्यकारणम्। विश्वेषु अमेरिका सर्वाधिकं२४ प्रतिशतं वायुप्रदूषणं करोति। (द्वितीयस्थाने चीन्, तृतीये युरोप्देशसमूह:)

अत्र चिन्त्यम्, कृष्णधूमप्रभावेण वायुवलयस्योपरि विद्यमानस्य ओजनस्तरस्य छिद्र: भवति। छिद्रमाध्यमेन सूर्यस्य मारात्मक: **"अल्ट्रावाओलेट्"** रश्मि: पृथिव्यां पतित्वा चर्मकर्कटरोगं कारयति। एवञ्च नाना अव्यवस्था: दरीदृश्यन्ते। अस्या: अव्यवस्थाया: कुपरिणति: सर्वै: भोक्तव्या:।

अर्थात् सर्वाणि समृद्धशालिराष्ट्राणि एवं वर्वरोचितकर्म कुर्वन्ति येन सर्वे विनष्टा: स्यु:। तत्र अमेरिकादेशस्य प्रभुत्वेन (दादागिरि) अन्येषां वस्तुवादस्योपरि आस्था दिनं दिनं वर्द्धते। अमेरिका ईदृश: एक: देश: यस्य काऽपि अनुचिन्ता नास्ति नापि नैतिकता आध्यात्मिकता वाऽस्यास्ति। यत: प्रायस्तत्र सर्वे प्रवासिन:। ते कथमपि विश्वस्य ऐक्यं कल्याणं नैव चिन्तयन्ति। **"युद्धं देहि"** आह्वानं तेषां मूलमन्त्र: भवति। अतएव अस्या: प्रदूषणसमस्याया: समाधानं चेतनाद्वारैव विधातव्यम्। वस्तुवादस्य चिन्तां परित्यज्य नीते: आदर्शस्य भावधारा उन्मोचनीया। एतेन आशुप्रलयस्य/विनाशस्य कश्चित्प्रतिकार: संभविष्यति। अन्यथा मृत्युरेव न संशय:।

**(सौजन्यम्- लोकभाषा: सुश्री: जनवरी- १९९९)**



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# सूचीपत्रम्


| क्र.न. | सृष्टि: | पृष्ठा |
|---|---|---|
| १. | संस्कृतस्य परिसर: प्रसारणीय: | ५ |
| २. | आधुनिकसमाजे संस्कृतस्य आवश्यकता | ७ |
| ३. | कालजयी | ९ |
| ४. | एकं सत्कर्म बहुधा भवति | ९ |
| ५. | अभाव: | १० |
| ६. | आदर्शचिकित्सक: | ११ |
| ७. | संस्कृतभाषा | ११ |
| ८. | कदा दुर्गति: ? | १२ |
| ९. | भारतं नमाम: | १३ |
| १०. | विजयतां भुवि भारतभावना | १३ |
| ११. | निरपेक्ष: | १४ |
| १२. | परिवर्तनम् | १५ |
| १३. | अतिथिदेवो भव | १५ |
| १४. | धूलिधूम: | १७ |
| १५. | केन सर्वं भावितम् ? | २१ |
| १६. | प्रकशक उवाच | २१ |
| १७. | पाठक उवाच | २२ |
| १८. | उपाठक उवाच | २२ |
| १९. | राजकन्या | २२ |
| २०. | श्रेयस्कामे | २३ |
| २१. | मेघ | २४ |
| २२. | अन्त: दृष्टि: | २५ |
| २३. | अखिलपापितारण | २६ |
| २४. | आशापाश: | २७ |
| २५. | आशापाश: | २७ |
| २६. | आगच्छतु होलिके | २८ |
| २७. | मम दीक्षा संस्कृत रक्षा | २८ |
| २८. | वसुधैव कुटुम्बकम् | ३० |
| २९. | महापुरुष- माधवदेव: एवं भक्ति-रत्नावली ग्रन्थ: | ३१ |
| ३०. | श्रीगणेशस्तव: | ३४ |
| ३१. | मम देश: | ३५ |
| ३२. | सीमान्तगान्धी | ३६ |
| ३३. | नम: शिवाय | ३६ |
| ३४. | श्रीशिवानन्दाष्टकम् | ३७ |
| ३५. | राजधान्या उपकण्ठे | ३८ |
| ३६. | संस्कृतं कथं पठनीयम् | ३८ |
| ३७. | संस्कृतम् अनिवार्यं भवतु | ३९ |
| ३८. | ईश्वरबोधे नैराश्यम् | ४० |
| ३९. | शिशो हास: | ४१ |
| ४०. | मम ग्राम: | ४२ |
| ४१. | रोचते | ४३ |
| ४२. | अनु सन्धित्सु: | ४३ |
| ४३. | ईश्वरबोधे नैराश्यम् | ४४ |
| ४४. | यदि | ४५ |
| ४५. | मनोदाह: | ४५ |
| ४६. | चण्ड्यष्टकम् | ४६ |
| ४७. | भद्रं करोति ईश्वर: | ४७ |
| ४८. | मृत्यु:- आधुनिकताया: रूपकल्प: | ४८ |




Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# संस्कृतस्य परिसर: प्रसारणीय:

डॉ. सदानन्द दीक्षित:

अहमपि संस्कृतच्छात्रावस्थायां चिन्तयन्नासम् शीघ्रं कमपि उपाधिं संपाद्य विद्यालये महाविद्यालये वाध्यापको भविष्यामि। जीवनमग्रेसृतम्। साहित्याचार्यपरीक्षामुत्तीर्ण:। छात्रावस्थायां संस्कृतछात्राणां मानसिकं दैन्यं,हीनमन्यातां, आत्मविश्वासाभावं, औदासीन्यं महनुभूतवान् यत् सर्वं ममाप्यासीत्। किन्तु मम स्फुरिता चेतना जागरिता, अहं सचेतन: संजात:, एतानि हीनमन्यानि दूरीकृतवान्, संकल्पं कृतवान्, संस्कृतसुरक्षा-संवर्धनार्थं स्वार्थपरतां परित्यज्य किमपि कर्तुमग्रेसरो भवेयम्। छात्रावस्थायां य: स्वप्न आसीत्, स स्वप्न: भिन्नरूपेण उदभासत। चिन्तनमारब्धं, कार्ययोजना प्रस्तुता, धनप्राप्तये सर्वकारीय उद्योगोऽपि लब्ध: सौभाग्येन, तत: परमाजीवनं धावनमारब्धम्। अद्यापि तद्धावनमविरतं प्रचलति। आरम्भे लक्ष्यं यदासीत् तत्प्राप्ते: पूर्वं पुनरपि लक्ष्यं प्रसारितम्। कार्यशैली परिवर्तिता, कार्ययोजनापि रूपान्तरिता, कार्यपरिसर: वर्धित:, चिन्तने स्पष्टताऽऽगता। एतदर्थमादौ चिन्तितं संस्कृतस्य चतुर्भ्य: उपादानेभ्य भाषा-साहित्य-दर्शन-विज्ञानेभ्य: प्रथमत: संस्कृतभाषाया: भाषण-संभाषण, शिक्षण-प्रशिक्षण-सचेतनादिविषयेषु कार्यं करिष्यामि तेनैव सह सरलसंस्कृतभाषया नवीनसाहित्यलेखनं प्रकाशनं, साहित्यनिर्माणे प्रोत्साहनं, नाटकानां प्रदर्शनं, तदनुसारिणां नैकेषां चर्चासत्रसंस्कृतसम्मेलनादीनामायोजनं भवेयु: जीवनं धर्मक्लिन्नमकरवाम:। तथापि वयं प्रतिदिनं श्व: निमित्तं नवनवीनं स्वप्नं पश्याम: स्म।

अधुना मनसि कोऽपिभिन्नविचारो दृढमूलो भवति। प्राय: त्रिंशद्वर्षेभ्य: स: विचार: बीजरूप आसीत्। लोकभाषाप्रचारसमिते: विविधकार्यक्रमेषु समागता: नैके देशीया: विदेशीया: विद्वांस: संस्कृते विद्यमानं लोकोपकारकदर्शन-विश्वकल्याणकारकविज्ञानविषये बहुकिमपि कथितवन्त:। तत् श्रुत्वा मन्मनसि विचार: समागतो यद्यदि वेदादिसंस्कृतशास्त्रेषु लोककल्याणकारकं विज्ञानतत्त्वमस्ति तर्हि भारतसर्वकारेण भारतीयविज्ञानसंस्थानवत् भारतीयपारंपरिक- विज्ञानसंस्थानमेकं प्रतिष्ठापयेत्। यस्मिन् संस्थाने प्रबुद्धा: वैज्ञानिका: शास्त्रज्ञा: संस्कृतज्ञाश्चोपविश्य भारतस्य प्राचीनमौलिकविज्ञानविषये अनुसंधानं कुर्यु:, तस्य व्यावहारिकतां वैज्ञानिकतां उपादेयताञ्च प्रमाणीकुर्यु:। तादृशं प्रमाणं च विश्वस्तरे स्वीकृतं स्यात्। नोचेत् भारतीयशास्त्रेषु प्राचीनकालेऽपि भौतिकरसायनायुर्वेदभूगोलादिशतश: वैज्ञानिकतत्त्वान्यासन्निति श्रावं श्रावं समुल्लसनमात्रं भवति, कुत्रापि विद्वत्समवाये एतदुच्चार्य उपहासपात्राणि भावाम:। एतत्मास्तु इति विचार्य किमपि प्रामाणिकं संस्थानं संस्थापनीयं १९९२ पत्रं बहुवारमहं भारतप्रधानमन्त्रिणां मानवसंसाधनविकाशमन्त्रिणां सकाशे प्रेषितवानमस्मि। अत्यन्तगुरुत्वपूर्ण-राष्ट्रगौरवप्रदायकं विषयमिमं न कोऽपि सर्वकार: अंगीकरोतीति कारणं स्पष्टमेव।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

अधुना चिन्तयन्तु अस्माकं संस्कृतज्ञानां चिन्तनम्। वयं सर्वे जानीमो यत् संस्कृतस्य चतुर्षु उपादानेषु भाषा-साहित्यापेक्षया दर्शन-विज्ञानयोः लोकोपादेयता समधिकतरा एव। किन्तु वयं शतं वर्षेभ्यः विशेषतः स्वातन्त्र्योत्तरकाले प्रामुख्येन संस्कृतभाषाशिक्षणाय संस्कृतसाहित्यपरिशीलन- रचना-अनुवादविषयेषु वा गलद्घर्मप्रयासं कुर्मः। निष्ठुरं सत्यं वदामश्चेत् बहूनां मनसि कष्टं भवेत्, किन्तु किमनेन संस्कृतस्य महत्त्वं गुरुत्वं वर्धितं वा ? एतावता दीर्घकालेन संस्कृतस्य वास्तविकः शक्तिं वर्धयितुं न कोऽपि सामूहिकप्रयासो जातः। अतः क्रमशः संस्कृते विद्यमानं दार्शनिकं वैज्ञानिकं वा सत्त्वं संस्कृतेतरसमाजस्य हस्तसादभूत्। यदा संस्कृतज्ञाः लक्षशः संस्कृतभाषासाहित्यांगणे विचरन्तः जीविकाजीवनार्थं वारंवारमान्दोलनं हठाग्रहं कुर्वन्ति तदा संस्कृतस्य समुपादेयं रसं विपणीकृत्य संस्कृतेतरजनाः कोटिपतयः अर्वुदपतयः संजाताः। उदाहरणत्वेन सूचयामि-योगः संस्कृतशास्त्राधीनविषयः दर्शन-विज्ञानयोः अन्तःस्पर्शिनी विद्या। योगशास्त्रस्य विपणनं समग्रविश्वे सार्धैकशतवर्षेभ्यः आरब्धम्। विश्वविश्रुतेषु योगाचार्येषु अंगुलिगणनीयाः संस्कृतज्ञाः न सन्ति। अधुना विश्वे लक्षाधिकाः योगाचार्याः कोटिपतयःकोटिशः योगाभ्यासरताः विश्ववासिनः । संस्कृतज्ञानां भूमिकात्र नास्त्येवेति किं खेदस्य विषयो नास्ति। प्रमुखः दर्शनग्रन्थः श्रीमद्भगवद्गीता, पुनरपि श्रीमद्भागवतम् भवति दार्शनिकं पुराणम्। विश्वप्रसिद्धाः ये केचन गीताशास्त्रधुरन्धराः धर्मगुरवः, नामानि न लेखनीयानि, ते संस्कृतक्षेत्रात् न जाताः। तेषां सर्वेषां कियान् सम्मानः, कियद्वित्तं तत्तु कलयितुं न शक्यते। तस्मिन्क्षेत्रे संस्कृतज्ञानामभावः मां विषादयति। संस्कृतस्यैकं सामान्यविषयं ध्यानमाश्रित्य कश्चित् असंस्कृतज्ञः न केवलमात्मानं महाऋषिरूपेण पूजितोभवत्। अपितु विश्वे सर्वत्र विपुलसंपदाधिकारी संजातः। तथैवायुर्वेदः संस्कृतशास्त्रस्य वैज्ञानिकविभागः। संस्कृतछात्राः आयुर्वेदं पठितुं न योग्याः। अतः असंस्कृतज्ञाः तत्र प्रविश्यायुर्वेदीयं चिकित्साशास्त्रं कलुषितं कुर्वति, तेनैव व्यापारं कृत्वा समग्रविश्वे सम्मानं धनं च विपुलतयार्जयन्तीतितु संस्था संघटनं वा आयुर्वेदाध्यापनार्थं संस्कृतज्ञाः अनुमन्तव्याः इति हठाग्रहं कुर्वन्ति। तथैव भारतस्य मुनिऋषितपस्विभिः स्वज्ञानविज्ञानवलेन बहुविधं वेद-शास्त्र-पुराणेतिहाससाहित्यग्रन्थाः विरचिताः यत्र कोटिशः वैज्ञानिकं तत्त्वमुपलभ्येरकानिचन वैज्ञानिकतत्त्वानि हिन्दूनां संस्कृतौ आचार-विचार-सिद्धान्त-कर्मकाण्डादिषु साक्षादुपलभ्यन्ते,अपरणि बहूनि परीक्षापराणि वर्तन्ते। सद्यः करोनाविषाणुकारणात् समग्रे विश्वे करमर्दनं आलिंगनं वा न करणीयम्, दूरतो नमस्ते इति भारतीयसदाचारं आचराम इति आमेरिका-फ्रांस राष्ट्रपतयः, ब्रिटिशराजकुमारः कथयन्ति व्यवहरन्ति च। तथैव चीनदेशे करोनाविषाणुजन्यशवानां पारं भूतलसमाधिं परित्यज्य भारतीयं दाहसंस्कारं कुर्वन्ति। विश्वे बहुषु देशेषु करोनाक्रान्तिसमये सेवन्ते, निरामिषं भोजनं कर्तुं प्रवर्तयन्ति। एवं च यः भारतीयः स्पृश्यास्पृश्यविचारः आवहोः कालात् भारते प्रवर्तित



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

आसीत् अधुना समग्रविश्वे स सदाचारः अत्यावश्यकतया कठोरतया प्रवर्तते, प्रचार्यते। एतदृशाः लक्षशः सदाचाराः संस्कृतग्रन्थेषु विशेषतः धर्मशास्त्रेषु गृह्यसूत्रेषु च निर्दिष्टाः सन्ति। तेषां किमस्ति वैज्ञानिकं सामाजिकम् उपादेयत्वं, तद्विषये न किमपि कार्यं संस्कृतेज्ञैः आरब्धम्।

भारतवर्षे सर्वत्र प्रायः कोटिपरिमिताः पाण्डुलिपयः सन्ति, भारतसर्वकारस्य राष्ट्रिय-पाण्डुलिपिमिशन् पक्षतः २००३तः क्रमशः सूचना प्रदीयते। अहं विश्वसिमि निश्चयेन संस्कृतेन सहस्राधिकाः अप्रकाशितदुर्लभ्यपाण्डुलिप्यः तत्र स्युः, येषां संपादनं तु संस्कृतज्ञाःएव कुर्युः। एतत्कार्यं यदि दशसहस्रं संस्कृतज्ञाः दशवर्षाणि कुर्युः तर्हि तत्समाप्तं नैव भविष्यति। किन्तु एतदर्थं न संस्कृतज्ञानां पक्षतः कोऽपि दृढः आग्रहः संस्कृतज्ञसमाजः करोति, नवा संस्कृति-मानवसंसाधनमंत्रालयपक्षतः काऽपि सुचिन्तिता योजनाऽस्ति।

संस्कृतज्ञसमाजः गंभीरतया विषयेऽस्मिन् चिन्तयेत्, योजनाः प्रस्तूय सर्वकारपुरतः समुपस्थापयेत्। न केवलं भाषायाः शिक्षणविषये हठाग्रहः वा साहित्यरचने-समीक्षणे-कविसम्मेलने विरतिःस्याद् अपितु एतत्परिसरद्वयमतिक्रम्य संस्कृत-दर्शनविज्ञानेषु प्रसारितदृष्टिः भवेत्। तदर्थं कश्चनाग्रहः करणीय एवेति संस्कृतज्ञसमाजं सादरं निवेदयामि।

# आधुनिकसमाजे संस्कृतस्य आवश्यकता

**श्रीमती कल्याणी शतपथी**

भाषा समाजस्य मूलमन्त्रः। समाजस्य सर्वविध- उन्नतये समृद्धभाषायाः आवश्यकता विद्यते। समग्रभारतीयसमाजे याः भाषाः प्रचलिताः सन्ति, तासु संस्कृतभाषा मुख्यतमा। इयं भाषा सर्वभारतीयक्षेत्रे स्वातन्त्र्यम् अर्हति। प्राचीनयुगे अस्याः भाषायाः समुन्नतिः साधिता अभवत्। वैदिकयुगे अनया भाषया वेद- वेदान्त- दर्शन- न्याय- पुराणादीनि विरचितानि। संस्कृतस्य आदिकविरूपेण महर्षिः वाल्मीकिः सर्वादौ स्वीक्रियते। तदनन्तरं व्यासादयः महाभारतादिकं रचितवन्तः। अस्माकं जीवनयात्रायाः प्रतिपदक्षेपं संस्कृतमेव अपरिहार्यम्। आयुर्वेद-ज्योतिर्वेद-भरतनाट्यादिकम् अस्माकं जीवनप्रवाहेषु मुख्यस्थानमधिकरोति।

केचन पाश्चात्य-शिक्षाभिमानिनः इमां भाषां मृतभाषा इति वदन्ति। तेषां मतेन इयमतीव प्राचीना। अतः अस्याः उपयोगिता कुत्रापि न विद्यते। अस्माकं मतेन ते एव मृतकल्पाः। न तु अमृतनिस्यन्दिनी संस्कृतभाषा कदापि मृता स्यात्। आधुनिकयुगे अस्याः भाषायाः प्रयोजनीयता नितराम् अनुभूयते। इमामन्तरेण अस्माकं सर्वविधभाषासाहित्यं न परिपुष्टं भवति। अस्याः माध्यमेन वयं साहित्य- विज्ञान- गणित- पुराणेतिहासम् अवगन्तुं शक्नुमः। अपि च प्राचीन ग्रन्थादिकम् अधीत्य वयं सदाचारमार्गेण परिचालिताः भवामः। संस्कृतं विना संस्कृत्याः उन्नतिः न सम्भवति।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

सूक्तिमालाम् अधीत्य वयं सन्मार्गेण गन्तुं प्रभवाम:। मानवजन्मन: मरणं यावत् प्रतिक्षेत्रम् इयं भाषा अस्माकं साहाय्यं विदधाति। समग्रभारतवर्षे बहव: भाषा-भाषिण:, धार्मिका:, विभिन्न-जातय: निवसन्ति। तेषां मध्ये ऐक्यस्थापनार्थम् अस्या: यादृशी महीयसी शक्ति: विद्यते, अन्यभाषाक्षेत्रेषु तादृक् मूल्यवोध: न विद्यते। आध्यात्मिकक्षेत्रेषु इयं प्राचीनतमा। अस्या: विचारधारया सर्वत्र साम्यं विराजते। कदाचिदपि संकीर्ण्णता अस्यां भाषायां नावलोक्यते।

केचन वदन्ति इयमेव पण्डितानां भाषा, न तु साधारणजनताया:। नैतत् सत्यम्। इयमेव यथा कठिना तादृशी एव सरला। सावलील-प्रकाशनरीत्या इयं भाषा संस्कृतानभिज्ञानामपि मनांसि हर्त्तुं यथा समर्था तथा पण्डितानां पक्षेऽपि क्लिष्टा प्रतिभाति। अस्या: भाषाया: शब्दप्राचूर्य्यं अन्यभाषासु न विद्यते। अस्या: उपयोगितां समुपलभ्य अस्या: सर्वविध- उन्नतये अस्माकं सर्वकारा: प्रयतन्ते। अस्माकं राज्ये एक: संस्कृतविश्वविद्यालय: पुरीनगर्यां प्रतिष्ठापित:। अयमेव आनन्दस्य विषय:। अपि च केचन आधुनिका: संस्कृतविद: युवान: अस्या: भाषाया: प्रचारार्थं प्रचेष्टन्ते। पुनश्च केन्द्रसर्वकारपक्षत: आकाशवाणीमाध्यमेन दिवसस्य द्वि: संस्कृतस्य वार्त्ताप्रचार: भवति। सर्वविधशिक्षास्तरे संस्कृतस्य बाध्यतामूलकपठनं कर्त्तव्यम्।

अधुना समाजे सर्वत्र विशृङ्खला परिदृश्यते। नीतिमार्गं केऽपि नानुसरन्ति। प्रतिदिनं धार्मिकचेतनाया: ह्रास: उपलभ्यते। परस्वापहरणे आधुनिका: युवान: प्रमत्ता: सन्ति। नारीशिक्षाया: सफलरूपायनं नानुभूयते। प्रत्यहं पारस्परिक- संघर्षं हत्यादिकं च जनजीवनं दुर्विसहं करोति। अत: विचार्य्यते अस्मिन् दुर्द्दिने समाजस्य रक्षणाय अस्या: भाषाया: उपयोगिता वर्त्तते। मानव: इमामधीत्य नीतिमयं जीवनं यापयितुं यथा समर्थो भवेत्, न तावत् भाषान्तरेषु।

अस्या: भाषाया: शिक्षार्थम् आबलवृद्धवनिता सर्वे सचेष्टा: भवेयु:। संस्कृतानुरागिण: विद्वांस: अपि प्रतिग्रामं गत्वा इमां भाषां प्रचारयन्तु। अस्या: सरलीकरणार्थम् आधुनिका: युवपण्डिता: चेष्टन्ताम्। तर्हि आधुनिकसमाजे अस्या: साफल्यं सर्वे अङ्गीकरिष्यन्ति। प्रचीनधर्मशास्त्रादिकं पठित्वा सन्मार्गेण जना: गन्तुं समर्था: भविष्यन्ति। समाजे शान्ति: सद्भावस्य अभिवृद्धिफलेन भारतीया: शाश्वतम् आनन्दम् अनुभविष्यन्ति। संस्कृतं विहाय अस्माकं काऽपि उन्नति: न सम्भविष्यति। यत: उक्तम्-

यावद् भारतवर्षं स्यात्
यावद् विन्ध्यहिमाचलौ।
यावद् गङ्गा च गोदा च
तावेदव हि संस्कृतम्।।

- o -

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# कालजयी

**मिनति दास:**

आकाशसदृशं तव व्यक्तित्वं विस्तृतम्
सागरस्य गरिमापि मापयितुं न शक्नोति।
धरित्री क्रन्दति, यामिनी वर्षति शोणितम्
तथापि सर्वंसहे, हलाहलं तव कण्ठमूले?
त्वं चिरंजीवी, अम्लानवदन:, सुदीर्घ-प्रयाणे भास्वरप्रतिम:
कोटिजन-हृदयमन्दिरे तव पूजाध्वनि:
पाप-ताप-हिंसा- विरहित: सुकोमल- ललित- विग्रह:
जाति- धर्म- वर्ण्ण- निर्विशेषे तव मुख- मधुर- संगीतं
सुमहत्, जीवनदर्शनम्।
मैत्रीबन्धने तव अश्रुपात: शान्तिवार्त्ता प्रशान्ती करोति
तथागत निर्दिष्ट- मार्गे हि दिशि दिशि धर्म- स्थापनाय
त्वं परिव्राजक:, त्वमेव शरणम्।
अयि प्रियदर्शिन्! प्रियं वद, अमरभूवने
दिग्वलयसीमातलात् नि:सरतु तव आगमने
स्वत: इयं वसुन्धरा अन्तर्द्वन्द्वे अविरत- शरणकातरा।

**ड़क्टर हरेकृष्णमहताव-संस्कृतमहाविद्यालय:, कटकम्**

# एकं सत्कर्म बहुधा भवति

**प्रफेसर सरोजिनी भूयाँ**

न कोऽपि बन्धनहेतु:! न कोऽपि बन्धनत्राता
कर्मैव बन्धनहेतु कर्मैव बन्धनत्राता
कर्मणा प्रोक्तेन तु सुखी वा दु:खी वा
दुषित: परिवेश: कोऽपि वा हेतुरत्र।
कर्मणा जायते खञ्ज: कुब्ज: अनङ्गसुन्दर:
कर्मणैवेति अल्पायु: आयुष्मान् च सत्यवागीश्वर:।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

पोषक: नात्र पिता न भर्त्ता न पुत्रो वा
पूर्वकर्मणा धावति नारी कन्या कान्ता माता
पूर्वजन्मनि यादृष्टा रोपिता संस्काररूपा
सा न पूज्यते अत्र काले पुष्पफलै: च।
माता पिता भर्तृस्नेह अनुजा पति- भक्तिर्वा
कर्मणा धावति अग्रे न कोऽपि तस्यानुगत:
कर्मणा लभ्यते येनं कर्मणैव कलेवर:
कर्मणा ज्ञानं धनञ्च कर्मणा सर्वसम्भवम्।
कर्मणा भवन्ति जङ्गमा: लोके
कर्मणा जायन्ते स्थावराश्च सर्वे
एकं सत्कर्म बहुधा च भूत्वा
करोति लीलाञ्च मनुष्यलोके।

**शैलवाला महिला महाविद्यालय:**

# अभाव:

**डॉ. प्रमोदकुमार नायक:**

कस्याश्चित् सुप्तभाषाया: तस्या: साहित्यस्य च उन्नतिनिमित्तं यत्नशील: भवति गोदावरीश:। तन्मतेन दर्पणस्वरूपस्य साहित्यस्य यदि प्रचार: बहुलतया भवेत्, तदानीमेव मानवसभ्यताया: आत्मपरिचय: स्पष्ट: स्यात्। प्राचीनम् ऐतिह्यम् वर्तमानस्य प्रकृत: उपदेष्टा भवति साहित्य-माध्यमेन एवेति। अत: तदा आरभ्य स: चेष्टां करोति। लेखकानां समीपं गत्वा विभिन्नान् लेखान् आनयति। श्रेष्ठिन: धनं प्राप्नोति। इदानीं पत्रिकामुद्रणं प्रचलति मुद्रणालये।

शुभावसरे पत्रिकाया: उन्मोचनं जातम्। विक्रय: आरब्ध:। अथ च न कोऽपि क्रेता आगच्छति न वा क्रीणाति। तथापि नैव चिन्तित: भवति गोदावरीश:। मूल्येन विना पत्रिकाणां वण्टनं करोति। तस्य लक्ष्यं खलु सुप्तभाषाया: प्रचार: भवतु। साहित्यस्य उन्नतिरस्तु।

परन्तु एकदा ज्ञातुं पारयति असौ- न केवलं तस्य पत्रिकाम् अधिकन्तु अन्या: पत्रिका: अपि जना: न पठन्ति। नाऽपि स्पृहयन्ति। एकदा रहसि चिन्तयति असौ- वस्तुत: साहित्यसाधने कर्मिणां धनस्य वा अभाव: नास्ति। अभाव: केवलं पाठकानामस्ति। सहृदयपाठकानाम् अभाव: एव साहित्यस्य भाषाया: वा अवमूल्यायनं करोति।

- ০ -



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# आदर्शचिकित्सकः

डॉ. प्रमोदकुमार नायकः

राज्यसर्वकारपुरस्कृत-चिकित्सकः ग्रामचिकित्सालयम् आयातीति श्रुत्वा आनन्दिताः भवन्ति। ग्रामजनाः। तेषां रोगनिराकरणं सहजसाध्यं स्यादित्यपि विश्वसन्ति। परन्तु स्वल्पदिनाभ्यन्तरे एषः विश्वासः विनश्यति। चिकित्सकस्य बलीयसी अर्थकामना पीडयति सर्वेषाम् अन्तःप्रदेशम्। प्रतिक्षेत्रम् अर्थं याचते चिकित्सकः।

एकदा शल्यचिकित्सासमये मुमुर्षुरोगिणः आत्मीयाः यदि धनं न दास्यन्ति तर्हि रोगी तथैव तस्मिन् प्रकोष्ठे स्थास्यतीति श्रुत्वा विकलाः आत्मीयाः कथञ्चित् धनं संगृह्य समर्पयन्ति। अन्यस्मिन् दिवसेऽपि अधिकधनं प्रदातुम् अक्षमः रोगी दिवं गच्छति। सर्वत्र चिन्ता जायते। विचारः प्रचलति। कश्चित् एनं चिकित्सकं विरुद्ध्य उपरितनस्य कृते अभियोगपत्रं लिखति। अन्यैः गणकोलाहलः क्रियते। अस्य बहिष्कारमिच्छद्भिः आन्दोलनं तीव्ररूपं नयति। चिकित्सकस्य दुर्नीतिविषये बहूनि प्रमाणानि उपलभ्यन्ते। सर्वे तस्य समुचितदण्डप्रदानाय चेष्टन्ते। सेवारूपके पवित्रकर्मणि संस्कारः आयातु इत्येव सर्वेषां मूललक्ष्यं भवति।

कालान्तरे तु तस्मिन् वर्षे आदर्शचिकित्सकरूपेण अयं केन्द्रीयपुरस्कारार्थं मनोनीतं भवति। निर्दिष्टे दिवसे पुरस्कारमपि गृह्णाति। अल्पदिनेभ्यः परं सोऽपि उन्नीतः सन् नगरस्थिते मुख्यचिकित्सालये योगं ददाति।

अध्यक्षः
दामोदरससंस्कृतमहाविद्यालयः, भद्रकः, ओडिशा

# संस्कृतभाषा

आल्फासुश्रीः स्वाइँ

सर्वे जानन्ति संस्कृतभाषा देवभाषा इति। या भाषा सर्वभाषासु जननीस्वरूपा। देवानां मुखनिःसृतवाणी गीर्वाणवाणी नित्याह्लाददायिनीयम्। अस्यां संस्कृतभाषायां भारतस्य संस्कृतिः निहिता अस्ति। तस्मात् संस्कृतं हि भारतस्य आत्मा। वेद-उपनिषत्-वेदान्त-ज्योतिष-महाभारत-पुराण-व्याकरणादिग्रन्थाः संस्कृतेनैव लिखिताः सन्ति। अस्माकं वेदे अनेकानि वैज्ञानिकतत्त्वानि सन्निहितानि। चिकित्साविज्ञानक्षेत्रे अथर्ववेदस्य आयुर्वेदस्य च अतुलनीयमवदानम् अस्ति एव। श्रीमद्भगवद्गीता संस्कृतस्य एकं परमाध्यात्मिकशास्त्रम्। गीताज्ञानं विना मनुष्यसंज्ञा सर्वथा असम्भवा।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

पूर्वे कथितमासीत्-संस्कृतभाषा अतीवकठिना। व्याकरणज्ञानं विना संस्कृतभाषां पठितुं न शक्यते। परन्तु लोकभाषाप्रचारसमितेः प्रयासबलेन अस्याः भाषायाः सरलव्यावहारिकरूपम् आविष्कृतम्। दशदिनाभ्यन्तरे एकहोरां संस्कृतप्रशिक्षणं नीत्वाा वयं संस्कृतेन वाक्यालापं कर्तुं शक्नुमः। अतः संस्कृतभाषा अतीवसरलतमभाषा। इयं भाषा लोकभाषा भवेत्।

**याजिपुरम्**

# कदा दुर्गतिः ?

**पराम्बा श्री योगमाया**

यस्याः संस्थितिः विश्वेऽभिनन्दिता
यस्याः संस्तुतिः स्वर्गेऽप्यभ्यर्थिता
कुत्र गता सा स्थितिः
कुत्र गता सा स्तुतिः ?
तस्याः प्रतिष्ठार्थं सर्वे चिन्तिताः ।।१।।

या पुरा देवैरर्चिता संसेविता
या भूमिः सती-साध्वीभिः सुशोभिता
तस्याः किमद्य जाता
का दुर्गतिरागता ??
तस्यारधिवासिनः अद्याप्यभुक्ता ।।२।।

किं कारणं कः सन्देशः अपेक्षते ?
को महान् निर्देशस्तु परिपाल्यते ?
को वा जानाति सर्वं
को वन्दिष्यति तद्
वस्तुजगति सर्वे परार्थत्यक्ताः ।।३।।

संस्कृतित्यक्तः परन्तु भारतीयः
कथं वा सम्भवेत् विपरीतार्थः
संस्कृति-भारतीय-
शब्दादयः संस्कृताः
तेषां समुचितव्यवहाराः काम्याः ।।४।।

निन्दन्तु नीतिनिपुणाः ..... नीतिं विना
धनिकाः समाजे धर्मधनं विना
युगप्रभावः एषः
तथापि भारतीयस्तु
जाग्रतः सदा संस्कृतात्मा जीवितः ।।५।।

न मृता मरिष्यति वा भारतीयता
ज्ञानप्रभया भाति सा जातीयता
विश्वमैत्री संहतिः ।।६।।

आदर्शेन जीवनं प्राणधारणं
मनीषिभिः दर्शितमुपसेवितं
आदर्शः हि संकल्पः
सुसंस्कृता संस्कृतिः
एते भवन्तु हि भारतीयप्राणाः ।।७।।

संस्कृतं संस्कृतिं न विस्मरन्तु के
प्रतिष्ठिता गुरुरूपेण विश्वे
मातुरश्रु सन्तानाः !
निवारणं कुर्वन्तु
देशमातृवन्दनाय संप्रस्तुताः ।।८।।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# भारतं नमामः

**श्री भूदेव आर्यः**

वयं भारतीयाः
भारतं वयं नमामः ....।
अन्नेन भारतस्य
जलेन च भारतस्य
परिवर्धिता सर्वे
ततो भारतं नमामः ....।
अनेकाश्च सन्ति भाषाः
अनेकाश्च सन्ति भूषाः
तथापि च अस्ति ऐक्यम्
ततो भारतं नमामः ....।

अनेके महापुरुषाः
बहवश्च देशभक्ताः
अत्रैव सर्वे जाताः
ततो भारतं नमामः ....।
जननी च जन्मभूमिः
स्वर्गाद् गरीयसीयं
मातृषु वन्दनीया
ततो मातरं नमामः ....।

# विजयतां भुवि भारतभावना

**डॉ. केशवचन्द्र महापात्रः**

अखिलविश्वपवित्रितचेतना
निखिलमानवजातिसुरक्षणा ।
अतिपुराणपुरः सरसाधना
विजयतां भुवि भारतभावना ।।१।।

सकलकर्मसु मर्मपरीक्षणा
भवति भा-रतभारतवन्दना ।
न हि कदा न कथं न तथाऽधुना
विजयतां भुवि भारतभावना ।।२।।

जनजीवनदुःशकयन्त्रणा
मरणदारुणदुःखविभीषणा ।
चलति चेतनचेतसि चिन्तना
विजयतां भुवि भारतभावना ।।३।।

त्वमसि भारति! भारतसन्ततिः
त्वमसि वैधसि! शाश्वतशाश्वती ।
त्वमसि देवगिरा गरुड़ासना
त्वमसि चेतसि मे शुभभावना ।।४।।

त्वमसि काव्यकलासु विलासिनी
त्वमसि भव्यविभावविकासिनी ।
त्वमसि मानवमुक्तिसु वासना
त्वमसि चेतसि मे शुभभावना ।।५।।

त्वमसि मानवमन्त्रमनस्विनी
त्वमसि दानवयन्त्रविनाशिनी ।
त्वमसि वैष्णवि! काम्यसुकामना
त्वमसि चेतसि मे शुभभावना ।।६।।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

त्वमसि सर्वपूज्यविधायिनी
त्वमसि दुर्मतिबुद्धिविकासिनी ।
त्वमसि देवमनुष्यसुसाधना
त्वमसि चेतसि मे शुभाभावना ।।७।।

अतिनिगूढरहस्यकबोधना
अतिपुराणविवेकसुपोषणा ।
अतिमहत्सुमहद्धृतचोदना
विजयतां भुवि भारतभावना ।।८।।

सकलकान्तिविकाससुकारिणी
सकलभावविभावविभाविनी ।
सकललोकान्नयनविधायिनी
विजयतां भुवि भारतभावना ।।९।।

परविपत्तिविनाशनतत्परा
विषयभोगसुखं प्रति निस्पृहा ।
अतिपुरातनवेदपरम्परा
विजयतां भुवि भारतभावना ।।१०।।

**बालेश्वर:**

# निरपेक्ष:

**डॉ. प्रमोदकुमार नायक:**

महाविद्यालये अध्यापकपदवीनिमित्तं वाक्परीक्षा प्रचलति। एकमेव स्थानं रिक्तमस्ति। पञ्चसंख्यका: परीक्षार्थिन: तत्र समागता: सन्ति।

वाक्परीक्षाया: प्राक् हठात् दूरभाषं वारं वारं गर्जितम्। प्रतिवारमुच्यते-

अहं स्थानीयजननेता कथयामि। अस्माकं दलस्य युवमण्डलसदस्य: श्रीधर: तत्र प्रार्थी अस्ति। तस्य चयनम् अवश्यं भवेत्।

अहं शिक्षामन्त्रिण: सचिव: वदामि। मम भगिनेय: गोपाल: भवतां साक्षात्काराय गतोऽसि। तस्य विषये भवान् अवश्यं चिन्तयेत्। कदा राजधानीम् आगच्छतु, भवत: पदोन्नतिप्रसङ्गे विचारयाम:।

भवन्त: माम् अवश्यं जानन्ति। अहं विशिष्टसमाजसेवी शान्तिप्रिय:। मम कन्या वेदमती यथा अस्यां वाक् परीक्षायाम् उत्तीर्णा स्यात् इति विषये यत्नं करोतु।

प्रोफेसर तपोनिधि: कथयामि। मम पुत्र: अभिमन्यु: तत्र तिष्ठतु इति मे इच्छा। भवत: कुशलं कामये।

परीक्षक: परीक्षां करोति। अन्तिमपरीक्षार्थिनं धनञ्जयं पृच्छति- तव पिता किं करोति?

बाल्यकालत: मम पिता स्वर्गत: इति उत्तरयति धनञ्जय:। परीक्षायाम् एतस्य प्रश्नस्य किं तावत् अन्तारहस्यम् इति नैव ज्ञातुं पारयति स:।

अनन्तरं सर्वेषां प्रश्नानाम् उत्तरं प्रदाय धनञ्जय: योग्य: विवेचित: भवति। परीक्षक: स्वस्य निरपेक्षं विचारं चिन्तयन् आनन्दितो भवति। अथ च कियत्क्षणाभ्यन्तरे अस्यां परीक्षायां दुर्नीत्याभियोगेन परीक्षक: दण्डितो भवति।

- ० -



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# परिवर्तनम्

**डॉ. प्रमोदकुमार नायक:**

ग्रामस्य शेषभागे देवदत्त: तिष्ठति। पितरौ बहुदिनेभ्य: विवङ्गतौ। अत: एकाकी तस्य जीवनयात्रा कथञ्चित् प्रचलति। एकदा ग्रामवासिभि: स्थिरीकृत: यत् अस्पृश्य: देवदत्त: ग्रामे तिष्ठति इति हेतो: ग्रामस्य अपमानं भवति। अस्पृश्यस्य वास: अत्र न स्यात्। अत: सर्वे स्वकीयविचारं ग्रामप्रधानाय निवेदितवन्त:। प्रधानोऽपि तत्क्षणादेव तेषां वचनमङ्गीकृतवान्। तत: आरभ्य देवदत्त: तत्र न उपविश्य श्मशानस्य निकटे सन्यासिन: एकस्मिन् परित्यक्तगृहे तिष्ठति।

एकदा अर्धरात्रौ ग्रामे अग्निसंयोग: जात:। गृहाणि दग्धानि। व्याकुलितं जीवनम्। क्रन्दनध्वनि: संश्रूयते दिक्चक्रबालम्। एकस्मिन् विषये चिन्तयितुम् अपरस्य समय: नास्ति। स्वस्य चिन्ता तदानीमेव बलीयसी सर्वेषां सम्मुखे। अथ च तस्मिन् समये कश्चन अविरतं साहाय्यं करोति। कुत्र अग्निं निर्वापयति कुत्र वा जनान् उद्धरति। शरीरस्य समग्रबलं ग्रामस्य हिताय एव उद्दिष्टं करोति स:।

हठात् कस्याश्चित् क्रन्दनध्वनि: तीव्रतर: जात:। सुप्तग्रामप्रधान: इदानीमपि शयनकक्षे तिष्ठति। कक्षस्य चतु:पार्श्वे अग्ने: लेलिहसी जिह्वा अग्रेसरति। सर्वे किंकर्तव्यमूढा:। ग्रामप्रधानस्य उद्धरणार्थं कस्यचित् साहसो न भवति। तत्क्षणात् कश्चन अग्निमध्ये प्रविशति। बाहुभ्यां प्रधानम् उत्तोल्य आनयति। सर्वे पश्यन्ति मन्त्रमुग्धदृष्ट्या देवदत्तम्।

कालरात्रि: अपसरति। सर्वत्र तस्य चर्चा तस्यैव प्रशंसा। कृतज्ञा: जना: दोषं स्वीकुर्वन्ति। ग्रामप्रधानेन सह सर्वे तत्रैव गच्छन्ति यत्र देवदत्त: निवसति। इत: आरभ्य स: ग्रामे स्थास्यतीति तेषाम् अनुरोध:।

कुटीरस्य द्वारदेशे तस्य आह्वानं भवति। उत्तरं नैव लभते। परिशषे केचन कुटीरस्य अन्त: प्रविश्य चीत्कुर्वन्ति। स्फोटशरीर: देवदत्त: मृत: इति पश्यन्ति।

# अतिथिदेवो भव

**डॉ.बनमाली बिश्वाल:**

उदालक: महर्षे: अरुणस्य पुत्र: आसीत्। नचिकेता च उद्दालकस्य पुत्र: आसीत्। उदालक: एकदा विश्वजित्-नामकं यज्ञमायोजितवान्। स: तस्मिन् यज्ञे स्वकीयं सर्वस्वं दानरूपेण प्रदातुम् ऐच्छत्। स: दानरूपेण धनं गावं च अददात्। दानाय समानीतासु गोषु काश्चन वृद्धा: गाव: अपि आसन्। नचिकेतसा चिन्तितम्- पित्रा एता: वृद्धा: धेनव: दानरूपेण दीयन्ते। एताभि: दानग्रहीतु: न



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

कोऽपि लाभः भविष्यति। अपितुः तेषां हानिरेव भविष्यति। एवं पितुः पुण्यापेक्षया पापमेव अधिकं भविष्यति। तर्हि कथं न अहमपि दानरूपेण अर्पितः स्याम्। येन अहं दानग्रहीतुः काञ्चित् सेवां करिष्ये। तेन मे पिता अपि पुण्यं लप्स्यते। एवं विचिन्त्य सः पितरम् उपगम्य अपृच्छत्- पितः। भवान् मां कस्मै दानरूपेण ददाति? पिता दानकर्मणि एतावान् व्यस्तः आसीत् यत् तद्वचने ध्यानमपि न अददात्। नचिकेता पुनः तमेव प्रश्नं पृष्टवान्। एतेन क्रुद्धः पिता अवदत्- अहं त्वां यमराजाय ददामि।

पितुः आज्ञां पालयितुं नचिकेता यमालयं प्राप्तवान्। यमराजः गृहे नासीत्। अत एव त्रीणि दिनानि यावत् नचिकेता तस्य प्रतीक्षामकरोत्। दिनत्रयानन्तरं यदा यमराजः गृहं प्रत्यागतवान् तदा सः पत्न्या सूचितः यत् कश्चन ब्राह्मण-बालकः दिनत्रयात् प्रतीक्षायामस्ति। सः अन्नजलमपि न स्वीकरोति। ततः यमराजः स्वयं जलपात्रं गृहीत्वा नचिकेतम् उपसर्प्य अब्रवीत्। महात्मन! भवादृशः ब्राह्मणः अतिथिः यदि मम गृहे बुभुक्षितः तृषार्तश्च तिष्ठति तर्हि मम समस्तपुण्यं विनंक्ष्यति। अतः भवान् प्रथमतः भोजनादिकं स्वीकरोतु। बुभुक्षितं भवन्तं प्रतीक्षार्थं विवशीकृत्य अहमात्मानम् अपराधिनं मन्ये। तस्य अपराधस्य प्रायश्चित्तार्थम् अहं भवते वरत्रयं दातुम् इच्छामि। भवान् किम् इच्छतीति यथेच्छं प्रकाशयतु। यमराजस्य व्यवहारेण सन्तुष्टः नचिकेतः वरत्रयं याचितुं निश्चयमकरोत्। महात्मन्! यदि भवान् मयि प्रसन्नः, तर्हि मह्यं प्रथमम् एव वरं ददातु यत् यदा अहं स्वगृहं प्राप्स्यामि तदा स्वपितरं क्रोधशून्यं द्रक्ष्यामि। सः मया सह प्रेमपूर्णं व्यवहारं कुर्यात्। सः जीवनस्य अन्तिमे क्षणे मत्पक्षतः यथा चिन्ताशून्यः तिष्ठेत् तथा किञ्चित् आचरतु येन सः नित्यं सुखपूर्वकं शेतुं प्रभवेत्।

यमराजः 'तथाऽस्तु' इति वदन् तस्य प्रथमं वरमङ्गीकृतवान्। ततः नचिकेता अवदत्- भगवन्! मया श्रुतं यत् स्वर्गे दुःखं न भवति इति। सर्वदा सुखमेव भवति। तत्र प्राप्य मनुष्योऽपि जरां मृत्युं च न प्राप्नोति। मया श्रुतं यत् कस्यचित् यज्ञस्य अनुष्ठानेनापि स्वर्गः प्राप्तुं शक्यते। अतः कृपया द्वितीय-वररूपेण तद् यज्ञविषयकं ज्ञानं मह्यं यच्छतु भवान्।

यमराजः विस्तारपूर्वकं यज्ञविषये उपदिष्टवान्- यज्ञवेदी कथं निर्मातव्या, केन मन्त्रेण कः विधिः आचरणीयः इत्येतत् सर्वं सः उपदिष्टवान्। अनन्तरं यमराजः नचिकेतं परीक्षितुम् इष्टवान्। अतः तेन यद् यद् उपदिष्टं तत् सर्वं विस्तारपूर्वकं श्रावयितुं नचिकेतम् उक्तवान्। नचिकेतश्च यत् यत् श्रुतवान् तत् सर्वं तथैव पुनः श्रावितवान्। तस्य स्मरणशक्त्या प्रभावितः यमराजः अवदत्- अद्य प्रभृतिभ्यः स्वर्गाय उद्दिष्टः यज्ञविधिः नाचिकेत-आग्नेनाम्ना प्रसिद्धिं प्राप्स्यति। ततः सः तस्मै अन्येषां यज्ञानां विषयेऽपि उपदिष्टवान्।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

तृतीयवररूपेण नचिकेता पृष्टवान्- केचन वदन्ति मृत्युना जीवनं समाप्तं भवति, न किञ्चिदवशिष्यते। परन्तु अपरे केचन वदन्ति यत् मृत्युना शरीरं नष्टं भवति, न तु आत्मा। आत्मा तु स्वकर्मानुसारं स्वर्गं नरकं प्राप्य पुन: कर्मानुरूपं शरीरं धारयति। सशरीरी भूत्वा स: पुन: पूर्वजन्मनि कृतानां कर्मणां फलं भुङ्क्ते। एवं स: जन्ममरणचक्रे परिभ्रमति। अनेन मतद्वैधेन अहं विमूढोऽस्मि। कृपया प्रसङ्गेऽस्मिन् किं तथ्यं किं वा अतथ्यमिति मां सूचयतु! एतं प्रश्नं श्रुत्वा यमराज: नचिकेतसं पुन: परीक्षितुमिष्टवान्- एष: कठिनतम: प्रश्न: अस्ति। अस्मिन् विषये चिन्तयन्त: बहव: स्वजीवनं व्यतीतवन्त:। समाधानं न प्राप्तवन्त:। अत: त्वमपि एतं प्रश्नमनुत्तरितं त्यज। अपरं वरं याचस्व।

तत् श्रुत्वा नचिकेता उक्तवान्- एतस्य वरस्य समक्षम् अपरं वरं व्यर्थमेव। भावादृशा: एव एतस्य प्रश्नस्योत्तरं जानन्ति। अत: तदुत्तरं ज्ञात्वैव अहं विरमामि। भवान् मां लक्ष्यभ्रष्टं न करोतु। तत: यमराज: तस्मै लोभं प्रदर्शितवान्- भो: बालक:! एतं वरं त्यज। अहं तुभ्यं राज्यं, धनं दीर्घायुश्च दास्यामि इति। परन्तु नचिकेता तेन विचलतो न अभवत्। अन्ततो गत्वा स: परीक्षायाम् उत्तीर्ण: अभवत्। प्रसन्न: यमराज: तस्य प्रश्नस्य उत्तरं दातुं प्रस्तुतोऽभवत्। वृक्षलता-पशुपक्षिषु सर्वत्र आत्मा अस्ति। अयम् आत्मा परमात्मन: अंश: अस्ति। शरीरं नष्टं भवति, न तु आत्मा। आत्मा तु अमरो वर्त्तते। मनुष्य: यथा कर्म करोति तथा फलं भुङ्क्ते। स: वारम्वारं जन्म-मृत्यु-सुख-दु:ख-चक्रे व्यापृत: तिष्ठति। अत्र मार्गद्वयं विद्यते। श्रेय: मार्ग:, प्रेय: मार्गश्च। य: सांसारिक-कर्मणि तत्पर: सन् आत्मनि, स्वपरिवारे च सीमित: भवति स: प्रेयमार्गमेव अनुसरति। एतादृश: पौन:पुन्येन जन्म गृहीत्वा सुखदु:खे भुङ्क्ते। पक्षान्तरे श्रेयं मार्गमनुसरन् य: आत्मन: कल्याणाय सर्वोत्तमान् गुणान् स्वीकरोति स: भगवद्भक्तौ भगवत्पूजने च आत्मानं नियोजयति। प्राणिमात्रे दयां प्रदर्श्य स: तेषां कष्टानि दूरीकर्त्तुं यतते। पितु: मातुश्च आज्ञां पालयन् दुर्गुणेभ्य: आत्मानं रक्षति। जन्ममृत्यु-चक्रात् सुखदु:खचक्राच्च मुक्तो भवति। अनेन उत्तरेण संन्तुष्ट: नचिकेता स्वपितु: उद्दालकस्य सविधे प्रत्यावर्तितवान् । अत एव उच्यते- तमेव विद्वान न बिभेय मृत्यो: (अथर्व. १०.८.४४)। अर्थात् तम् आत्मानं विज्ञाय मनुष्य: मृत्यो: न विभेति।।

# धूलिधूम:

**डॉ.रवीन्द्रकुमार पण्डा**

राधेश्यामबाबु: क्षणकोपी। साक्षात् कालानल इव प्रतिभाति क्रोधसमये। यद्यपि स: स्वभावेन सरल: परोपकारी दयावान् उदारहृदय: तथापि निन्दित:। क्रोधोपरि तस्य नियन्त्रणं



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

नास्ति। इयमस्ति तस्य महती दुर्बलता। कदा कदा विना विचारं कुप्यति। यदा कुप्यति तदा हिताहितं विस्मरति। तस्माज्जनमुखे तस्यापरं नाम दुर्वासा। अस्मिन् विषये सोऽपि सचेतनः कदा स्वदोषमवगम्य दुःखी भवति। आत्मानं धिक्कारं करोति। निर्भत्सयति स्वस्वभावम्। पश्चातापवह्निना प्रज्वलति। प्रतिज्ञां करोति क्रोधं त्यक्तुमाजीवनम्। किन्तु सा प्रतिज्ञा दिनद्वयं दिनत्रयं वा तिष्ठति। परिवारे पत्नी राधेश्यामबाबोः स्वभावविषये सुपरिचिता। तस्याः कृते विषयोऽयं सामान्यः। केवलं तस्मिन्नेव समये सावधानता आवश्यकी। अन्यथा अघटनघटने विलम्बो न भवेत्।

अधुना राधेश्यामबाबुः सेवानिवृतः। गृहे किमपि कार्यं नास्ति। समयप्रसारणं कठिनकार्यमस्ति। एकाकी गृहे तिष्ठन् विरक्तो भवति। विश्रामो व्याधिरिव दुःखदायकः। अध्ययने मनो न लगति। दूरदर्शनं प्रति श्रद्धा नास्ति। विभ्रमितुं मनो भवति। कथयितुं मनः कामयते। किन्तु कं तस्य हृदयचित्रं दर्शयिष्यति। अस्मिन् युगे कस्य निकटे समयोऽस्ति। यदि वा समयोऽस्ति वृद्धेन साकं मिलितुं कस्यास्ति स्पृहा। पत्नी सर्वदा गृहकार्ये व्यापृता। तस्या निकटे समयाभावो महान्। सा धनागारे कार्यं करोति। सार्धदशवादने गृहं त्यजति। षड्वादने गृहमागच्छति। मध्यकाले गृहे विराजते भूत इव अनन्तशून्यता। अखण्डनीरवता व्याप्नोति गृहस्य प्रतिकोणम्। राधेश्यामबाबुः शय्यायां निपतन् आत्ममन्थनं कुर्वन् अतीतं स्मरति। भविष्यद्विषये चिन्तयति। येन केन प्रकारेण समयं सारयितुं प्रयतते।

राधेश्यामबाबुः निस्सन्तानः। पुत्रमुखदर्शनं तस्य भाग्ये लिखितं नासीत्। तदर्थं बहुप्रयत्नः कृतः। दानधर्मादिक्रियाः निष्फलाः जाताः। ईश्वर उदासीनो जातः। अन्ते भाग्यरेखां स्वीकृत्य राधेश्यामबाबुः प्रयत्नहीनोऽभवत्। तथापि वेदना तु वेदना। हृदयात् सा यन्त्रणा न याति। यदा शक्तिरासीत् तदा सर्वं सुखमयमासीत्। सर्वं सुन्दरं प्रतीयते स्म। अधुना तु जरा डाकिनीव भीषयते। भयं विद्यते नरकासुर इव। यदा नियुक्तिरासीत् जना गृहमागच्छन्ति स्म। पत्राणि आगच्छन्ति स्म। दूरवाणी आगच्छति स्म। अधुना न कोऽपि पृच्छति। न कोऽपि निकटे समुपस्थितो भवति। न कोऽपि आह्वयति। न कोऽपि श्रोतुं श्रावयितुं वा प्रयतते। वृद्धो न कस्य साधनम्। न कस्य प्रयोजनम्। धनमस्ति प्रचुरम्। किन्तु तेन किं भवेत्। मनो मार्जार इव। शरीरं भग्नयष्टिरिव। पत्नी विषवल्लरीव। गृहं श्मशानमिव। वेदना विषबिन्दुरिव। शान्तिः सौदामिनीव श्वासो धूलिधूम इव। सन्तोषः सहचर इव। शय्या सर्पिणीव। आत्मबोधो दुर्बल इव। मार्गो मारणास्त्रमिव।

राधेश्यामबाबुरस्मरत्- 'चिदानन्दरूपः शिवोऽहं शिवोऽहं। काचिदपूर्वा स्फूर्त्तिः स्फुरिता शरीरे। प्रफुल्लो जातो मनोमयूरः। वेदना शिथिला जाता। दीर्घश्वासः संक्रमितः शरीरे। तेन निश्चयः कृतः। अद्य सायंकाले पत्नी यदा कार्यालयादागमिष्यति तां कथायिष्यति। कामसूत्रमिति सुन्दरमेकं चलच्चित्रं चलति नगरे। तद् द्रष्टव्यमस्ति। तदनु भोजनालये भोक्तव्यमस्ति। बहुदिनेभ्यो



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

भोजनालये न भुक्तम्। तदर्थमधीरा भवति रसना। प्रतिदिनं गृहभोजनं न रोचते। तदनु विपणीकेन्द्रं गन्तव्यम्। सर्वाणि वस्त्राणि जीर्णानि। नूतनस्यावश्यकतास्ति। पत्नीकृते नूतना बहुमूल्या शाटिका आनेतव्या। सा प्रसन्ना भवेत्। बहुदिनेभ्य: तस्यै न किञ्चिद्दत्तम् सा न किमपि कथयति। परन्तु मनसि अवश्यं चिन्तयति स्म। वस्त्राय न कस्या: स्पृहा? न वा कस्य भोजनाय स्पृहा? एवं सम्भावनायां विमन्थित: सन् सुखमनुभवन् सधैर्यं प्रतीक्षारतोऽभवत् राधेश्यामबाबु:।

सन्ध्या समागता। सार्धं षड्वादनं जातम् अतिक्रान्ता कमलाया: आगमनवेला। यथासमयं नागता सा। राधेश्यामबाबु: मार्गम् अवलोक्य अवलोक्य चातिक्लान्तोऽभवत्। किमपि अघटनं जातमिति नूतना चिन्ता हृयदं ग्रासितवती। प्रथमत: क्रोध: समुत्पन्न: तस्या: विलम्बनिमित्तम्। बहुविलम्बे सति अस्थिरता समुन्मादिनी चाभवत्।

राधेश्यामबाबो: मनोऽशुष्यत्। विक्रेन्दितमभवत्। कार्यालयेन सह सम्पर्क: साधित:। कमला तत: निर्गतेति वार्ता प्राप्ता। उपायान्तरमवलोक्य स चिन्ताजडो जात:। भगवन्तं स्मरन् इतस्ततोऽभवत्।

अष्टवादने पत्नी कमला गृहमागतवती। तां सुप्रसन्नामवलोक्य स: विस्मयाभिभूतो जात:। क्षणमध्ये एव पृष्टा अनेके प्रश्ना:- किं जातम्? कथमसि? अघटनं घटितं वा? प्रतिबन्धक: पतितो वा? यानं समीचीनं वा? सर्वं कुशलं वा? शरीरं स्वस्थं वा? कर्म व्यवस्थितं वा?...?

प्रश्नवर्षा: दृष्ट्वा रुष्टा अभवत् कमलादेवी। 'कथयामि कथयामि, क्षणं धैर्यं नास्ति। कथमस्थिरस्त्वम्?'

-कथमस्थिर:? अहं कियान् चिन्तातुरोऽभवम् त्वं जानासि?

-सर्वं जानामि। यस्य किमपि कार्यं नास्ति स इत्थं भवति। मम प्रियसखी दर्शना कार्यालयमागतवती। अहं तया सह विपणीं गतवती। आवाभ्यां बहुभ्रमणं कृतम्। सुन्दरे भोजनालये भूरिभोजनमपि कृतम्। सा मह्यमेकां शाटिकामपि उपाहृतवती। सा मम जन्मदिवसं संस्मरति। अत: विलम्बोऽभवत्। अहं दूरवाणीं कर्तुमपि विस्मृतवती।

राधेश्यामबाबुना त्वरितमेव स्मृतम्। अद्य कमलाया: जन्मदिनमासीत्। किन्तु तेन विस्मृतं प्रतिवर्षमिव। तस्मादप्रसन्ना कमला। सत्यं वदति मिथ्या वा भगवान् जानाति। परन्तु किं करणीयमधुना?

स्नेहपूर्वकं राधेश्यामबाबुरवदत्- 'कमले! अद्य मया चिन्तितम् ...।' 'तव चिन्ता तव निकटे रक्ष। मम नास्ति तस्या: आवश्यकता। अहमतिक्लान्ता। शयनं करोमि। न किञ्चिद् वद। भोजनालयेऽथवा गृहे यदस्ति तद् भक्षय। मम शक्तिर्नास्ति। प्रतिबन्धं न सर्जय।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

राधेश्यामबाबु: व्यथितोऽभवत्।। किन्तु किञ्चित् कथयितुं साहसो नासीत्। क्षणान्तरे साहसं सञ्चीय धीरस्वरेण कथितवान्- 'कमले! कथं क्रुध्यसि! दोषो भवति सर्वेषाम्। ममापि अभवत्। अनेन ...।' 'त्वं दूरमपसर। निद्रा समायाति। स्वकार्यं कुरु। अस्मात् स्थानाद् बहिर्गच्छ।' - सक्रोधं तर्जितवती कमलादेवी।

तस्या: वाणी राधेश्यामबाबो: मर्मस्थलम् अतुदत्। अन्तरात्मा तस्य क्रन्दितुमारभे। क्लेशकातरं जातं मन:। सर्वा वासना विगलितेव। सर्वा तृष्णा तरलितेव सर्वा स्वप्नधारा शुष्केव। आशातन्तुर्विदारित इव। कथमपि तमाघातं सोढ्वा स: गृहं त्यक्त्वा पलायितुं निश्चितवान्। तूष्णीं बहिर्गत्वा यानमारुह्य चारितवान्। यानस्य शब्दं श्रुत्वा बहिरागत्य कमला तमाहूतवती। किन्तु किमपि नाकर्णितं तेन। यानमपि द्रुतं प्रस्थितम्।

चिन्तातुरा जाता कमला। किं कृतम्, कथं कृतमिति प्रश्ना: तां तुदन्ति। यत: सा जानाति राधेश्यामबाबो: स्वभावम्। सहधर्मिणी सा। तेन साकं तया बहूनि वर्षाणि व्यतीतानि। दूरं गता तस्या: निद्रा। त्रस्तोऽभवन्मनोमृग:। विंशतिनिमेषानन्तरं द्वारे ठक् ठक् शब्दोऽभवत्। कमला विचारितवती यद् प्राय: राधेश्यामबाबु: भोजनालयाद् भोजनं संगृह्य प्रत्यागतवान्। पुन: ठक् ठक् शब्दो जात:।

-अरे! क: शब्दापयति?

-अहं दामोदर:। शीघ्रं द्वारमुन्मोचय।

-अरे! किं जातम्? किमावश्यकम्? किं कार्यमधुना रात्रौ?

-अघटनं घटितम्। द्वारमुन्माचय। बहिरागच्छ।

-किं घटितं वदतु।

-दुर्घटणा घटिता राधेश्यामबाबो: यानं चूर्णम्। अधुना स चिकित्सालये। करौ चरणौ च आघातप्राप्तौ। त्वं सत्वरमागच्छ। स त्वामेव संस्मरति।

विना विलम्बं कमला चिकित्सालयं प्राप्तवती। तत्र दृश्यं सामान्यमपि चित्तविदारकमासीत्। समग्रशरीरं क्षतविक्षतमभवत् राधेश्यामबाबो:। तीव्रयन्त्रणा भवति स्म। चिकित्सकमहोदय: सेवारत आसीत्। स कारणं पृच्छति स्म। किन्तु राधेश्यामबाबु: स्थाणुरिव नीरवोऽभवत्। यन्त्रणा तं ज्वलयति स्म। कमलां विलोक्य तस्य मुखमण्डलं सुप्रसन्नं जातम्। नयनद्वयं यथा कथयति स्म- त्वमत्र आगत्य उत्तमकार्यं कृतवती। भयविह्वला कमला राधेश्यामबाबो: मस्तकं सधीरं धारयित्वा तस्य मुखे करं सञ्चालितवती। चिकित्सकस्य निर्देश: आसीत्- यद्यपि व्रण: सामान्य इव प्रतीयते, वस्तुत: तथा नास्ति। अत: एकमासं यावत् चिकित्सालये एव स्थातव्यम्। तदर्थं व्यवस्था कर्त्तव्या।

-सर्वा व्यवस्था भविष्यति। भवान् कृपया एतेषामुपरि ध्यानं ददातु। अहं सर्वं साधयिष्यामि



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

इत्युक्त्वा व्यवस्थायां विलग्ना कमलादेवी। द्वादशवादने सर्वा प्रारम्भिकोपचारक्रिया सफलतया समाप्ता। विश्रामाय राधेश्यामबाबुं चिकित्सालयस्यैकस्मिन् प्रकोष्ठे स्थापितवन्तः कर्मचारिणः। कमलादेवी राधेश्यामबाबोः निकटे उपविश्य जलमर्पयति स्म। पृच्छति स्म- किं भवति?

-कष्टं भवति। अति कष्टं भवति। सधीरमुदत्तरत् राधेश्यामबाबुः।

-कष्टं तु भवेदेव। तत्तु सोढव्यम्।

सामान्यकथोपकथनेन व्यतीता रात्रिः। गवाक्षमार्गेण पतितसूर्यकिरणे उद्भासते स्म स्पर्शकातरः धूलिधूमः। तथैव दाम्पत्यकलहः स्पर्शकातरो जातः स्नेहोपचारेण। तथापि जनाः रात्रौ बहिर्गमनस्य कारणं पृच्छन्ति स्म।

## केन सर्वं भावितम्?

**परम्बा श्रीयोगमाया**

केन रचिताः मधुरहासाः बालानामधरे
स्थापितानि नक्षत्राणि गगनमण्डले?
सखि!
केन सृष्टः चन्द्रमा हि दिवसप्रान्ते रे
पश्य सकृत्,
को हि तत्र श्रीनीलकन्दरे।।१।।

केन घटिताः मेघे मेघे वृष्टिविन्दवः
सुदृश्यं तु शिखिनः पिच्छं वर्णमण्डितम्?
सखि!
केन दृष्टं केन रचितं सूर्यमण्डलं
पश्य पश्य एकवारं चक्रनयनम्।।२।।

मन्दिरस्य वर्णो यः सः देवतायाः पुनः
जगतः प्रतिकोणं तस्य कृष्णवर्णः।
सखि!
त्वं तु पश्य कृष्णमेघं शिखीकृतमनसा
यस्मिन् मेघे सुशोभन्ते
कलाः हि षोडशाः।।३।।

## प्रकाशक उवाच

**डॉ. अरुणरञ्जनमिश्रः**

भवतां रचना
सत्यमतीव सुन्दरी
परमस्माकं समीपे बहुरचनाः
पूर्वदिव निपतिताः, जराजीर्णाश्च
प्रकाशयितुं न शक्नुमः।
अस्मिन् लाभो नास्ति।

भवन्तोऽपि कथं
स्वप्रकाशकत्वेन अर्थक्षतिं नेष्यन्ति?
अतः हस्तलिपिं भवतां नीत्वा गच्छन्तु।
परं भवतां रचना
सत्यमतीव सुन्दरी।।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

## पाठक उवाच

**डॉ. अरुणरञ्जनमिश्रः**

अस्माभिर्नोपदिष्टो भवान्
कवितां रचयितुम्।
कोकिलोऽपि यथास्माभिः
नोक्तः गीतं गातुम् ।।

भवद्भिः पुस्तकं स्वप्रकाशितम्।
परं ततः पूर्वं वयं न पृष्टाः
-क्रेष्यामो, न वा ।।

साधुकृतं भवता
यत् पुस्तकमेकं स्वयं प्रकाशितम्।
व्रत-विवाह-यज्ञ-मन्दिराणामिव
एतदपि पुण्यं कर्म ।।

अस्मास्वपि विदग्धता अस्ति
कोकिलस्य कुहुरिव कदापि कुत्रापि
सुखेन, अनर्थेन च लब्धं चेत्
पठिष्यामः ।।

यदीच्छसि
मतमपि दास्यामः ।।

## उपाठक उवाच

**डॉ. अरुणरञ्जनमिश्रः**

वयं पुस्तकं पठामः।
नोचेत् प्रतिदिनं किं वा न क्रीणीमः?
यदि कदा स्थूलमुपचितं च लिखन्ति,
तर्हि सूचयन्तु,
कक्षसौन्दर्याय अवश्यं क्रेष्यामः ।
इदानीं नाम-फामार्थं किञ्चित्
कुर्वन्ति वा न वा?
पुरस्कार-फुरस्काराय धावनं प्रारब्धम्,
अथवा विलम्बोऽस्ति?

## राजकन्या

**डॉ. हर्षदेवमाधवः, अहमदावाद**

(५)

राजकन्या त्वन्तर्धाना जाता
कृपाकटाक्षं प्रदीप्य
अन्तःपुरस्य वैदूर्यखचिते कक्षे
स्तम्भेषु शतप्रतिविम्बेषु
सौन्दर्यराशिं विस्तार्य
तस्या वक्षःस्थले
चूतमञ्जरी सुरभिपेलवा वसन्तलहरी
प्रविष्टा वा नेति न जाने ।

किन्तु
मनुष्यशोणितक्लिन्नचरणः
अकस्मान्मदोनमत्ततां गतो गजः
राजमार्गं दूषयित्वा
हस्तिपकाङ्कुशपातपीहितः
प्रविष्टो हस्तिशालाम् ।।

(६)

मदनमहोत्सवे
शृङ्गककोटिजलैस्स्नाता
राजकन्या
शयनकक्षे
उपाधानं नयनाश्रुजलसिक्तं विवर्णं करोति।
अपूजितः सरोषो मदनः



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

स्तनांशुकसन्धी: शतधा करोति।
प्रस्वेदसिक्तायास्तस्या:
निश्वासै:
विवर्णा भवन्ति
स्फटिकस्तम्भेषु
रत्नदीपप्रकाशा: ।।

(७)

वीणायां प्रसरन्त्य:
राजकन्याया अङ्गुल्य:
प्रस्वेदखिन्ना अचेतना इव
स्थैर्यं भजन्ते।
सङ्गीतमाधुर्यमग्ना सारिका
पञ्जरस्थाऽपि
राजपुत्रि! वादय वादयेति कथयति
सोद्वेगम्।
किन्तु
अश्वरूढ: क्षण:
अतीतं गत:।
राजकन्याया:
वक्षोगवाक्षे
रिक्तमार्गशून्यता वर्तते।
मनसो नैमिषारण्यं नि:शब्दमस्ति।
अपिहिताद् वातायनाद्
दृश्यन्ते
सौधशिखरे पारावता:।
राजकन्या
वीणेव स्थिता मूका।। .... (क्रमशः)

# श्रेयस्कामे

डॉ. अच्युतानन्ददाश:

प्रेयसि! त्वं श्रेयांसि मे नित्यं नु वाञ्छसि!
'श्रेयांसि बहु विघ्नानि' इत्यपि जानासि।
श्रेयसि मां चोदयन्ती
कर्तव्यं चोपदिशन्ती
कालात्ययं निर्दिशन्ती
प्रतिक्षणं त्वरयन्ती
मानसं मे किमिति क्लिश्नासि?
प्रेयसि! त्वं ... ...
श्रेयांसि हि आत्मगति:
आत्मरति: आत्मप्रीति:
मत्संगतिं विना किं तां
तामवस्थामवाप्स्यसि!
प्रेयसि! त्वं ... ...
आत्मश्रेयांसि यो जन:
नो जानीते, नापि तन्मनुते
न वा तद्गतमनसा प्रववृते कथंचन
किमसौ स्वेतरं जनं
नियोजयति श्रेयसि?
प्रेयसि ! त्वं ... ...
सुसंमृद्धि: प्रतिष्ठा वा
प्रेष्ठा तव प्रतिदिनम्
प्रतिवेशिस्त्रिभि: समम्
अलंकारैरलंकृतिम्
भवनं यान-वाहनम्
यदाढ्यतानिदर्शनम्
किमहं नोपभूञ्जीयाम्
इत्येवं नित्यं ब्रवीषि!



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

प्रेयसि! त्वं … …
तेषु तेषु गृहेषु त्वं
तेषां वा हृदयेष्वपि
प्रविश्य स्वयं प्रेक्ष्यस्व
स्थितिं गतिं मतिं वापि।
नो शान्तिर्न प्रीतिस्तत्र
नात्मीयता विराजते
किं तेन जीवितेन स्यात्
नात्मा यस्य स्वस्यात्मन:!
संपन्नता विपन्नताम्
अधितिष्ठति यत्र तु
तत्र किं श्रेयो विद्यते
यत्र मां त्वं प्रेरयसि?
प्रेयसि! त्वं … …
एहि मे हृदयं, पश्य
का प्रतिष्ठा तवात्र वै
किं वित्तजातं त्वत्कृतेऽत्र
संचितमर्जितं मया।
तां प्रीतिं तां प्रतिष्ठां वा
लभते पौर्वदेहिकीम्
या तयात्मगतया वा
तादात्म्यं समवाप्नोति।
प्रेयसि! तत्र श्रेयसि
त्वमपि मां नियोजय
कुण्ठां त्यज आकण्ठं च
निमज्ज प्रेमसरसि।।
प्रेयसि त्वं … …

# मेघः

**डॉ. प्रमोदकुमार नायकः**

दूरे आकाशे आविर्भूय
यः निम्नस्तायाः पृथिव्याः
दुःखावबोधने व्यग्रः भवति
असह्यां वेदनाम्, अपरिसीमं कषणम्
अवलोक्य, यस्य हृदयं क्रन्दति
स्वकीयं सुखजालं, विवर्द्धितं मनोभावं
विस्मृत्य, यः सामग्रिकभावेन
आत्मानं नियोजयति
सः मेघः
निःस्वार्थपरबन्धोः परमम् उदाहरणम्।
मेघः कदा नैव अपेक्ष्यते
प्रार्थिनः धैर्यसीमाम्
अथ तस्य प्रार्थनायाः गभीरतां परीक्षणाय।
कुत्र तस्य निन्दुकाः प्रशंसकाः वा
जलाकाङ्क्षिणः भवन्ति
इति विचारे नैव निमग्नः मेघः
नाऽपि जाति-गोत्रादिकं विचारयति कदाचित्
जलवितरणे
सन्तप्तहृदयानां क्लेशविनाशने।
यदा आत्मरतौ सर्वे निमग्नाः
कोशपूरणे सर्वे यतमानाः
तदानीं मेघः
लवणाक्त-सागर-वक्षसः
केवलम् अमृतं चिनोति,
बहुकष्टेन अतन्द्रश्रमेण।
विपुलजलभारेण विवर्द्धितः मेघः
आनतः भवति स्वकीयेन औदार्येण



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

पुष्करावर्त्तकादि-वंश-परम्परानुसारेण
सः स्वीयम् अतीतं पश्यति
जलहीनां स्वकीयां दुःखस्थाम्,
अन्यस्य शून्यतायाः यातनां
स्वस्मिन् अनुभवति।
असौ वर्षति
दीर्घकष्टेन सञ्चितं धनं
अन्येषु वितरति
अकातरेण।
वर्षणकाले मेघः कदा
नहि चिन्तयति भविष्यतः मुहूर्त्तं
तस्य विलासार्थं विभवस्य आवश्यकतां
यतो हि
सः वर्षण-रसिकः
वर्षणे एव तस्य सृष्टेः सार्थकता।
मेघस्य दानेन
नद्यः पुष्करिण्यः ह्रदाः
शून्यतः पूर्णतां प्रयान्ति
दारिद्र्यमवहेय धनिकाः भवन्ति
अथच परमधनाढ्यः मेघः
दानेन आशाहीन-वितरणेन
शून्यः भवति
प्रत्यकेषु जन्मसु।
तथापि
नैव कदापि मेघः दानाय
कातरः भवति
जलवितरणे
कार्पण्यं प्रकटयति।

**प्राचार्यः, दामोदर संस्कृत**
**महाविद्यालयः, भद्रकः**

# अन्तः दृष्टिः

**श्री विपिन विहारी शतपथी**

एकः रजकः लण्डितः सन् आयाति। मार्गे मन्त्री पृच्छति- अरे कथं लण्डितः? रजकः क्रन्दन् वदति-राजा मृतः। मन्त्री दुःखेन क्रन्दन् लण्डितः जातः। मन्त्रिमुखात् राजा मृतः इति श्रुत्वा राज्ञी विधवाव्रतम् आचरिता। परिषदि शोकसभा समनुष्ठिता। राजानुचराः लण्डिताः सन्तः क्रन्दन्ति। अस्मिन्नवसरे राज्ये राजा प्रविष्टः। राजकर्मचारिणः तं दृष्ट्वा चकिताः। राजा सभाम् आहूतवान्। अनुसन्धानात् ज्ञातं यत् रजकस्य राजा नाम्ना गर्धभः मृतः।

अतः कस्मात् किमपि श्रुत्वा न किमपि करणीयम्। जनः किमपि करोति चेत् दुःखं लभते। परिवारे कदापि असन्तोषः भवेत्। तस्य समाधानं करणीयम्। परिवारः न त्यक्तव्यः। परिवारे यथा आनन्दं मिलति तथा अन्यत्र न मिलेत्। यत् करणीयम् तत् सम्यक् चिन्तनीयम्। वृथा समयव्ययः अनुचितः। यतः समयः अतीव मूल्यवान्। समयनष्टः न करणीयः, पृथिवी



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

विशाला। कालः अनन्तः। कर्त्तव्यरेखा असीमा। बहवः बिघ्नाः, स्वार्थः निकटतमः। मनः पराधीनम्। इन्द्रियाः स्वार्थपराः। प्रतिज्ञा दोदुल्यमाना, तथापि अविचलितः प्राज्ञः। इतरः जनः मुग्धः चकितः। आत्मानं पश्यति। इतस्ततः दृष्टिं निक्षिपति। ''गतस्य शोचना नास्ति''- वाक्यं स्मरति। अग्रे दृष्टिः नूतनसूर्यं पश्यति। सर्वत्र किरणाः पतन्ति। परं स्वीकुर्वन्ति शुद्धजलं। स्वदृष्टिः परिवर्त्तिता। ईश्वरं निन्दति प्रशंस्यति च। कथं मन्दभावना मनसि भगवता आनीता। किं तस्य उद्देश्यं। वृथा गालिं ददाति। पुनः चिन्तयति-ईश्वरः मंगलमयः। स्वदोषस्यारोपः ईश्वरे न करणीयः। ईश्वरः इच्छति सर्वे भवन्तु सुखिनः ....। न किमपि नूतनत्वम्। पुरातनस्य गमनं नूतनस्यागमनम् एषः नियमः। भगवता श्रीकृष्णेन प्रोक्तम्- वासांसि जीर्णानि....। अस्तु तावत् नूतनवर्षे पूर्वसंकल्पम् अविस्मृत्य नूतनोत्साहेन कर्मतत्पराः भवन्तु अन्यान् कारयन्तु च सर्वे।

- ० -

**लीलामूर्त्तिः परमवपुषो विश्वस्रष्टा विसृष्टा**
**वेद्यावेद्ये चरमपरमे यस्य भाभाति नित्यम्।**
**दीने हीने प्रसरति सदा पुण्यपीयूषधारा**
**वन्दे नित्यं प्रभुगणपतिं मोक्षदानैकहेतुम्।।**

**पण्डित कुलमणि नन्दः**

# अखिलपापितारण

**श्री पूर्णचन्द्र उपाध्यायः**

जय प्रभो नारायण! अखिलपापितारण।
ददातु हे प्रभो भक्तिं मम हृदि।
करोमि ते गुणगानम्,
रत्नसिंहासने शोभमान प्रभो!
योगिमनः आकर्षणम् ।।१।।
स्थितिपालनसंहारहेतोः! त्वया
सर्वं विश्वं शोभमानम्,
दीनजनबन्धो! हे दयासागर!
भवतु तव दर्शनम् ।।२।।

असारसंसारे मानवमीनोऽहं
दुस्तरं मे सन्तरणम्,
तव नाम स्मृत्या सञ्चरामि नाथ!
धेनुवत्सा- अनुयानम् ।।३।।
न च आवश्यकम् अनित्यवस्तुषु
याच्ञा भवतु प्रभो! निखिलस्य
इदं मम निवेदनम् ।।४।।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# आशापाशः

डॉ. केशव चन्द्र महापात्रः
अध्यक्षः व्याकरणविभागः
नरेन्द्रनाथ संस्कृत महाविद्यालय
प्रियवाक् , वालेश्वरम्

प्रभातस्य
प्रथमस्पर्श-
पूतः
पुलकितः रोमाञ्चितः
नलिन्या जीवनप्रकाशः
आत्मानं
धन्यं मन्वानः
अज्ञानेन कदा
पिहितोऽन्तः
सन्तुलितो व्यथितः
क्लिन्नमनाः
निद्राति
नित्यमभिसारं
स्मरन्नसौ
दरिद्राति
हा हन्त ! हन्त !!
निराशभृङ्गः
दूरं प्रयातः !!!
विधातुर्हस्ताङ्कितैः
श्चित्रिता
कृतिरियं
विचित्रा !
शश्वच्चेत -
श्चेतयति
क्व रात्रौ मिलन्तो
दिवा त्यजन्ति,
क्व पुनः
रात्रौ त्यजन्तो
दिवा मिलन्ति .........

# शुष्कमीनः

कुमारी सञ्जुक्ता गिरि

ग्रामस्य नाम कुक्कुटपुरम्। तत्र बृद्धः वीरभद्रः निवसति। तस्य पुत्र द्वयम्। रमेशः भवेशः च। दरिद्रः परिवारः। परिवारे रमेशस्य स्त्री शारला, भवेश्स्य स्त्री ऊर्मिला एवं प्रकारेण पञ्चप्राणिनः निवसन्ति। प्रतिदिनं शुष्कमीन-व्यञ्जनं भवति। एकदा ग्रामे शुष्कमीनाभावः परिलक्षितः। अथ सर्वे किंचित् न खादित्वा शुष्कमीनसंग्रह-निमित्तं ग्रामान्तरं गतवन्तः। सद्यः मीनं ते मूर्खाः खादितुं न इच्छन्ति। अतः सद्यः मीनं मारयित्वा शुष्कं कारयन्ति। चतुरः बिड़ालः शुष्कमीनगन्धद्वारा आकृष्टः भवति। यदा परिवारस्य जनाः मीनसंग्रहं कुर्वन्ति तदा विडालः मीनं खादति। के अपि किंचित् ज्ञातुं न पारयन्ति। किन्तु ते केवलं शुष्कमीनः कुत्र गच्छति इति अन्वेषणं कृत्वा कृत्वा अनाहारेण मृत्युवरणं कुर्वन्ति।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# आगच्छतु होलिके

**कुमारी ज्योत्स्नाराणी सूतार**

वर्षात् परं समागता होलिके!
गृह्णातु अस्माकम् अभिनन्दनम् ।
सर्वासु पुरपल्लीषु दास्यसि आनन्दम्
लोकानां हृदये मधुरं हर्षम् ।
दु:खमध्ये दास्यसि सुखस्य सन्धानम्,
लोकेभ्य: दास्यसि एकता ज्ञानम् ।

राधाकृष्णयो: भक्तिं सर्वेषां जनानां,
गृह्णातु अस्माकम् अभिनन्दनम् ।
प्रतिवर्षम् आगत्य सखि होलिके,
सद्भाव- रङ्गेण रञ्जयतु लोके ।
जयतु जयतु होलिके! कामना अस्माकम्,
गृह्णातु सादरम् अभिनन्दनम् ।

# मम दीक्षा संस्कृतरक्षा

**श्री विष्णुनारायण मिश्र:**

वयसा स्वल्प:। प्रायश: शिशुतुल्य:। पठामि नवमसोपाने। भाषात्रयं नित्यं पठामि अहम्। परन्तु, तत्र संस्कृतभाषा मधुरा सरसा कान्तकोमला नैव क्लिष्टा न च कठिना, परमहृद्या वन्द्या अपरूपा मनोहरा। तथापि युगेऽस्मिन् कथम् अवहेलिता? सम्वादपत्रेषु पठ्यते प्रतिदिनं संस्कृतं प्रति सर्वकारनीति: कीदृशी। माध्यमिकशिक्षास्तरे संस्कृतमारण-नीति:। अहो! कीदृश: घृण्य: पदक्षेप:।

अपि कथयन्ति केचन किम् आवश्यकं दुर्वोध्यप्राचीन- संस्कृतेन। परन्तु ते न जानन्ति दशदिनेषु एव संस्कृतभाषा शिक्षा दीयते। लोकभाषा-प्रचारसमिते: संस्कृत आन्दोलनं न पश्यन्ति ते। परं एषा मम अभिज्ञता। दशदिनात्मक-शिक्षादानेन अहम् अद्य संस्कृतेन वार्त्तालापं करोमि। तथैव बहव: मे बान्धवा: विद्यालये वार्त्तालापं कुर्वन्ति। संस्कृतेन वार्त्तालाप: अतीव आनन्ददायक:। सत्यं कथयामि यदा वयं वार्त्तालापं कुर्म: तस्मिन् समये स्वर्गीयसुखम् अनुभवाम:। यथा देवभाषां कथयित्वा देवा: अनुभवन्ति स्वर्गपुरे। तस्मात् एष: मम दृढसंकल्प:। भविष्यत्काले यत् भविष्यामि अहं कृषक:, शिक्षक:, अध्यापक:, अधिवक्ता, यन्त्री, चिकित्सक:, सेवक:, प्रशासक: वा न विस्मरामि संस्कृतमातरम्। तस्या: कृते जीवितम् इदम् उत्सर्गीकृतम्। प्रचाराय प्रसाराय समयं प्रदास्यामि अहम्। वृथा कथयन्ति नेतार: रक्षतु भारतस्य संस्कृतिं संहतिम् ऐतिह्यं च। परन्तु कथं सम्भवेत्? संस्कृति:, दिवास्वप्न: एव। यदि नेतार: जातीयसंहतिविषये चिन्तयन्ति, तर्हि यद्यपि अहं शिशु: तथापि विचन्त्यि कथयामि। पठन्तु संस्कृतम्, पठनव्यवस्थां कुर्वन्तु संस्कृतस्य। तत् विना संस्कृति-संहति-रक्षणे दिवास्वप्नं न पश्यन्तु ते। तस्मात् पुनरपि कथयामि पठन्तु संस्कृतं रक्षन्तु भारतम्। ततो हि, मदीया दृढ़दीक्षा, संस्कृतमातु:सुरक्षा।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

## आर्द्रता

तथाप्यत्र श्रूयते मृत्युशब्द:
वटपत्रमर्मरिषु पुन:
न त्यजति कल्पछायां वृद्धवृक्ष:
क्रमविक्रमयो:
नगराज छायया पृथिवी
श्रमजलसिक्तमयी जाता
बालहस्तपुटे पुष्पाञ्जलिं
अस्तगामिसूर्यस्य किरण:
आकर्षति मधुरसङ्केतै:
नाहं जाने मधुमन्दध्वनि:
मधुरस्था मानवकुशला
नीहारसिक्तपत्रेषु
कोकिलकाकलि:
मृदुतरा मधुरप्रणया
लुक्कायित: रविरश्मि: यत्र
नीरवमध्याह्ने ।।

**प्राध्यापक: दिगम्बर दाश:**

## नीलनदी

वन्याजलप्लावनभूमौ हि
दण्डायमान: य: वृद्ध:
मानदण्ड: जीवनस्य
दरिद्रजनस्य
रक्तदेहं वहन् पश्यति
मानवं, मानवस्य कालं
महाकालं ...... मन्वन्तरम्।।
मरालगामिनी कापि
प्रचलति मानसमन्दिरं
धूप-दीप-धूमगन्धान् वहन्ती
नदीगर्त्तजलस्य तरङ्गै
अशान्ता स दयासक्तर्दुर्दिनाकूपारे ।।
कदाचित् स्वयंम्भु: गर्जति
नीलनदीतटान्तवीक्षणे
वदति गछतु .... आगच्छतु ....
प्रत्यागच्छतु मामपि
काऽपि विभावरी

## दोलोत्सव:

**पद्मालया**

दोलोत्सव: होलिपर्व
जातीयविभवमेव।
होलि फगुलीला मन्दिरे
गृहे ग्रामे पथे नगरे ।
दूरं याति नानारोग:
वर्द्धते सुखसम्भोग:।
परस्परं सहयोग:
सांस्कृतिक विनियोग:।
राधागोविन्द मेलनम्
अतीव रम्य दर्शनम्।
प्रीतिपुलक सञ्चार:
मैत्रीवाणी सुप्रचार:।
पौराणिक नाना कथा
सज्जन पालन प्रथा।
होलिका मृत्यु वार्षिकी
पृथ्वी वासन्ती नर्त्तकी।
परम्पराक्रमे धरा
भवति सदा मधुरा ।
दोलायां दोलगोविन्द:
जयति परमानन्द: ।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# वसुधैव कुटुम्बकम्

**गौरप्रिया दाश:**

भगवत: संरचना इयं अनतिक्रमणीया सृष्टि:। विश्वेऽस्मिन् स्तरे स्तरे भगवत: स्थिति: विराजमाना। चिरदिनम् अमृताधिकारिणी इयं मानवजाति:। सर्वे मानवा: परममङ्गलमय-कारुणिकस्य स्रष्टु: एकैकशो निदर्शनानि। सर्वजीवानाम् उत्पत्तिस्थलं, सर्वजीवानां निष्कृतिस्थलं, सर्वजीवानाम् आदर्शाश्रयावलम्बनं कल्मषकुलसंहारको भगवान्। सर्वेषाम् उत्पत्ति: तस्मात्, सर्वेषां भूते भूते स्तरे स्तरे विराजमान:। अस्माकं आर्यमनीषिभि: एवमुक्तम्-

**एक एव हि भूतात्मा भूतेभूते व्यवस्थित:।**
**एकदा बहुधा ब्रह्म दृश्यते जलचन्द्रवत्।।**

इयम् अनतिक्रमणीया श्रृङ्खलिता सृष्टि: समानताया: महामन्त्रं प्रचारयति विश्वेऽस्मिन्। अमृतस्य सन्ताना: सर्वे मानवा: विश्वद्वारि समाधिकारिण:। ईश्वरस्य द्वारि नास्ति कश्चित् प्रभेद: धनिनिर्द्धनयो:, शाशकशाशकयो: ब्राह्मणचण्डालयो:, पामरप्रेमिकयोश्च:। विश्वपितु: समक्षे सर्वे समाना:, सर्वेषां हृदि विराजमाना परंब्रह्मण: सत्ता। विशालविश्वस्य सम्राट् धन्य: स भगवान् य: जगत्कर्त्ता पालयिता हर्त्ता च। धन्य: स: महाभावसर्वस्व: विश्वनियन्ता य: समानताया: महामन्त्रं प्रददाति अखिलविश्ववासिनां कृते। लीलाभूमि: इयं वैचित्र्यमयी सृष्टि:। वृक्षलतावायुव्योमवारीणि प्रतिरेणवोऽपि। अथापि विभिन्न वैसादृश्ये सादृश्यम्, अनैक्ये ऐक्यम् असाम्ये च साम्यप्रतिष्ठा संस्कृते: वीजमन्त्रम्। सृष्टिप्राचुर्यशालिनी भवति अस्या: महत्ताया: सम्मिश्रणेन। दृश्यते परं संप्रति महान्विपर्यय: यद्धुना सृष्टि कलुषिता एव। संस्कृते: स्थाने अपसंस्कृति: आदर्शस्थाने अनादर्श:, परम्पराया: स्थाने अपपरम्परा समानताया: स्थाने विषमता, उदारताया: स्थाने च स्वार्थैकप्राणता परिपूर्णा। संप्रति अखिले विश्वभूखण्डेऽपि। अधुनातने विश्वे विज्ञानमेव अभिशापतुल्यं विशंपति, जड़वादि वैज्ञानिकी उन्नति: प्रतिमानवं निकषा सृजति स्वार्थैकप्राणतां जड़वादितां च। मारणास्त्रनिर्माणेन मनुष्य: मरणोन्मुखतां प्राप्नोति संप्रति। स्वजातिघातिना परिणत: मानव: अधुना मानवस्य रिपु:। विज्ञानस्य अग्रगत्या अधोगतिं प्राप्नुवन्ति विश्वदेशजाति मनुष्य: च। शतं धिक् तद् विज्ञानम्,शतं धिक ताम् उन्नतिम्, शतं धिक् अपि तन्मारणास्त्रनिर्माणम्, शतं सहस्रं च धिक् तान् मनुष्यान् ये आदर्शनाम्ना अनादर्शं समानताया:नाम्ना विभेदं ऐक्यनाम्ना अनैक्यम् प्रगते: व्याजेन च अधोगतिं प्राप्नुवन्ति। अत: परं जातिप्रथा एका महती प्रतिघातिनी समताया:। ईश्वरस्य सन्ताना: सर्वे समाना:। परं ब्राह्मणक्षत्रिय- वैश्यशूद्रादिजातिविभाजनं कथं सम्भाव्यते ? अयं केवलं कुसंस्कारमात्रम्, सर्वेषु विराजमानं परंब्रह्म। राजसु, प्रजासु, ब्राह्मणेषु तदितरवर्गेषु च समतया विराजमाना तस्य शक्ति:। यदुक्तम्-



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि,**
**शुनि चैव श्वपाके च पण्डिता: समदर्शिन:।।**

जातिप्रथात: अस्पृश्यताया: सृष्टि:। अस्पृश्यताया: प्रभावेण मानव: पशुत्वम् अधिगच्छति। द्वन्द्ववाद- विसम्बादै: परिपूरित: अधुना विश्व:। कहलरक्तपातादीनि, नानाकुकार्याणि सततं विराजमानानि विश्वेऽस्मिन्। पुञ्जिवादसमाजवादाभ्यां विभाजिता इयम् अमृतमयी पृथ्वी। धनिकै: निष्पेषिता: निर्यातिता:, लाञ्छिता:, शोषिता: च समाजस्य श्रमिका:। अपरेषां कर्मभि: अपर: प्रभूयते, अनेकेषां धनै: एको भवति भर्त्ता, अनेकेषां दानै: एक: प्रतिष्ठाता, अनेकेषां ग्रामै: एक एवाधिकारी। अनेकेषां भोजनपात्रम् अपहृत्य एक: करोति वत्रिशभोजनम्, अनेकेषां पर्ण्णकुटीरं विभज्य एक: निवसति उत्तुङ्गहर्म्ये, अनेकेषां छिन्नवासांसि छित्वा एक: परिधत्ते महार्हवस्त्रम्। निर्यातितानां धनहीनानां श्रमै: धनिका: भवन्ति परिपोषिता:, निष्पेषितानां दूषणे ते हसन्ति पैषाचिकहास्यम्। धन्य: एष समाज:। धन्या: एते मानवावरणधारिण: पुच्छशृङ्ग विहीना: पशव:। अत: परं धर्मविद्वेषिणी नीतिरपि। एको बलवान् संरोध: समानताया:। सांप्रतिकी धर्मनीति: धर्मान्धाया: परिचायका। 'विनाशकाले विपरीतबुद्धि:' न्यायेन अनेन पथा चलन्त्या: पृथिव्या: ध्वंसएव अनिवार्य:। इमं संकीर्ण्णमनोभावं परित्यज्य महाभावेन अनुप्राणिता भवितव्या इयं विश्वसंस्कृति:। सर्वे विश्ववासिन: महासंस्कृत्या: वीजमन्त्रं ''वसुधैव कुटुम्बकम्'' इति नीतिं हृदि निधाय अमृतानुसन्धानिन: भवेयु:। सत्यमेतत् यदि सर्वे विश्ववासिन: समस्त समादर्शं विहाय आदर्शवादेन अनुप्राणिता भविष्यन्ति, तदा मर्त्त्यम् एव स्वर्गे परिणतं भविष्यति। परापरभावो केवलं लघुचेतस: संकीर्त्तता। परम् उदारचरितानाम् वसुन्धरा एव कुटुम्बकम् इति समीचीनेयमुक्ति:-

**अयं निज: परोवेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।। इति**

- o -

# महापुरुष- माधवदेव: एवं भक्ति-रत्नावली ग्रन्थ:

**नारद:**, **आसाम:**

असमीया-जातीय-जीवनस्य एवं संस्कृत्या: मूलाधारस्य निर्माता, असमीया-साहित्यस्य अन्यतम: स्रष्टा, नववैष्णवधर्मस्य एकान्तसाधक:, महापुरुष-शङ्करदेवेन सह समभावेन संलग्न: सज्जन: हि महापुरुष: माधवदेव: इति नाम्ना प्रसिद्ध:, स्मरणीयश्च। महापुरुष: माधवदेव: बहुधा गीतम्, नाटकम्, भक्तितत्त्वमूलकम् इत्यादिविषये नानाग्रन्थान् विरचय्य असमीयासाहित्यम् इतोऽपि समृद्धं कृतवान्, अपिच साहित्यक्षेत्राय एकां नूतनगतिं प्रदतवान् अस्ति। भारतस्य पूर्वाञ्चलप्रान्ते



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

नववैष्णवधर्मस्य प्रचार-प्रसारकार्ये माधवदेवस्य अतिविशिष्टा भूमिका अवर्तत।

महाभागस्य १४८९ तमे ख्रिष्टाब्दे, असमराज्यान्तर्गतस्य 'नारायणपुर' इति क्षेत्रस्य 'लेतेकुपुरखुरीपार' इति स्थाने जन्म जातमासीत्। माधवदेवस्य पिता- गोविन्दगिरि:, माता- मनोरमा च इति नामधेयौ तस्य सुशीलौ पितरौ आस्ताम्। तस्य शैशवकाल: हरिसिंहवरा-गृहे, एवं घाघरमाजे: आश्रये अतिवाहित:। तदनन्तरं पित्रा सह वण्डुकास्थितं प्राक्तनं गृहं प्रत्यागतवान्। तत्र चतुर्दशवर्षीयस्य तस्य अध्ययनार्थं राजेन्द्राध्यापकस्य संस्कृतटोले नामपञ्जीकरणं जातम्। तस्यां शालायां सम्यक् अधीत्य स: स्वल्पसमयावधौ हि सुशिक्षाम् आसादितवान् आसीत्। यदा स: पितृविहीन: जात:, तदा मण्डुकां परित्यज्य माजुल्यभिमुखं स्थानान्तरित: अभवत्। तत्र आत्मीयस्य रामदासस्य साहाय्येन तस्य महापुरुष-शङ्करदेवेन सह परिचय: अभूत्। माधव-शङ्करयो: मध्ये देवीपूजा, बलिविधानम् इत्यादिविषयम् अनुसृत्य नानायुक्तितर्कादिकं समुत्पन्नम् आसीत्, परम् अन्ते माधवदेव: तद्विषये पराजितोऽभवत्। तत: स: शङ्करदेवस्य शरणापन्न: जात:, नववैष्णवधर्मस्य गुरुरूपेण तम् अङ्गीकृतवान्। तत्पश्चात् शङ्करदेवेन सहैव स: नववैष्णवधर्मविषयक: परमसाधक: प्रचारकश्च सञ्जात:।

माधवदेव: प्रसिद्ध: कवि:, नाट्यकार:, गीतिकार:, धर्मप्रचारक:, सुगायकश्च आसीत्। तस्य महाभागस्य साहित्यक्षेत्रे एकं स्वकीयं वैशिष्ट्यं विराजमानम् अस्ति। तेन रचितेन नाट्यमाध्यमेन वैष्णवधर्मस्य महिमा प्रचारित: दृश्यते। तस्य मन: श्रीकृष्णस्य शिशुरूपं प्रति अत्यन्तम् आकृष्टम् आसीत्। तस्मात् तस्य गीतेषु विशेषत: बालरूपस्य श्रीकृष्णस्य नानाचौर्यकार्यम्, चाञ्चल्यम्, चातुर्यादिकं प्रकाशितम् अवलोक्यते। रामायणस्यापि स: आदिकाण्डस्य हि भाष्यं कृतवान् अस्ति। अनेन स: श्रीरामस्य बाल्यकालस्य नानाचरित्रं स्वेच्छया वर्णयितुम् अशक्नोत्। तस्य नाटकम्, गीतम् इत्यादिकं प्रायश:, वात्सल्यरसेन परिपुष्टं वर्तते। तस्य गीतानि महाराष्ट्रस्य तुकारामस्य, एवम् उत्तरभारतस्य सुरदासस्य गीतै: सह तोलयितुं शक्यानि।

तेन विराचितानि नाटकानि एवं सन्ति-'चोरधरा', 'पिम्परा गुचोवा', 'भोजन विहार', 'भूमि लेटोवा', 'अर्जुन भञ्जन', तदुपरि 'रासझुमुरा', 'कोटोरा खेला', 'ब्रह्ममोहन', 'भूषण हरण' इत्यादीनि।

आख्यानमूलक-रचना:-

रामायणम् आधृत्य 'आदिकाण्ड' भागवतं च अनुसृत्य 'राजसूयकाव्य' चेति।

तत्त्वमूलकरचना:-

'जन्मरहस्य', 'भक्ति रत्नावली', 'नाम मालिका', 'नामघोषा' चेति। माधवदेवस्य सर्वोत्तमा, प्रसिद्धा च कृतिरेव-'नामघोषा' इति।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

गीतम्– माधवदेवस्य 'वरगीत', 'भटिमा' इत्यादिकी असमीया- गीतिसाहित्यस्य काचित् अमूल्यसम्पत्। 'वरगीत' इत्यस्य उदाहरणत्वेन चरणद्वयम् अत्र प्रस्तूयते-

''तेजरे कमलापति परभात निन्द।
तेरि चान्द मुख पेखो उठरे गोविन्द।।''
''याहेर चरन रेणु योगी नापाइ।
भकति बले ताको बन्धन कराइ।।'' इति।

माधवदेवस्य तत्त्वमूलकग्रन्थः 'भक्ति-रत्नावली' इति। महापुरुषीय-वैष्णवधर्मे शङ्करदेवस्य 'कीर्तन-घोषा', 'दशम' इति ग्रन्थद्वयस्य यत् स्थानम्, तदेव स्थानं माधवदेवस्य 'नामघोषा', 'भक्ति-रत्नावली' इति ग्रन्थद्वयस्य। एतद्ग्रन्थचतुष्टयं महापुरुषीय-वैष्णवधर्मस्य मुख्यस्तम्भभूतं वर्तते।

महापुरुष-माधवदेवेन विरचितस्य 'भक्ति-रत्नावली'- ग्रन्थस्य मूलाधारभूतः- 'विष्णुपुरी' नामधेयस्य सन्यासिनः 'भक्ति-रत्नावली' इति ग्रन्थः। अस्य मूलग्रन्थस्य ग्रथाकारस्य विष्णुपुरिणो विशेषपरिचयो नोपलभ्यते। केवलं स महाभागः आत्मानं 'तैरभक्त-सन्यासी' इति कथयति स्म। लोकविश्वासानुसारं विष्णुपुरिणः सम्पूर्णं नामासीत् 'विष्णुशर्मा' इति। तस्य महाभागस्य जन्म मिथिलायाः 'तिरौणी(तरौणी वा)'- इतिनामके ग्रामे, ब्राह्मणपरिवारे च जातमासीत्। संस्कृतभाषायाम् एवं शास्त्रादिषु तस्य अनुपमेया पारदर्शिता आसीत्। तत्त्वज्ञानप्राप्तेः अनन्तरं सः सन्यासधर्मं स्वीकृतवान् जनश्रुत्यनुसारं विष्णुपुरी प्रथमविवाहं विधाय, पश्चात् तत्पत्न्याम् अशिष्टाचरणं परिलक्ष्य च तां परित्यक्तवान्, तथाच गृहसंसारमोहादपि तस्य वैराग्यं जातम्। तदनन्तरं मिथिलायाः कस्मिंश्चित् शिवमन्दिरे निवसन् निरुपायत्वेन द्वितीयविवाहं सम्पादितवान्। तन्मन्दिरे यदा आसीत् तदा हि सः 'भक्ति-रत्नावली'-ग्रन्थं विरचितवान् इति कथ्यते।

'भक्ति-रत्नावली' इति ग्रन्थः भक्तिविषयकः कश्चन सिद्धान्तग्रन्थः। 'रत्न' इत्युक्ते कश्चन मूल्यवान् पाषाणः। 'आवलिः', 'आवली' इति वा काचित् पङ्क्तिः, माला वा; अतः रत्नानां आवली- 'रत्नावली' इत्यत्र षष्ठीतत्पुरुष-समासः युज्यमानो वर्तते इति। अतः अस्मिन् ग्रन्थे भक्तितत्त्वविषयकः सारभागः सङ्गृहीतः वर्तते पद्यैः।

माधवदेवेन तद्ग्रन्थात् उद्धृतं चरणैकम् एवमस्ति-

''भक्ति-रत्नावली नामे नाइ पटन्तर।
परम-अमूल्य रत्न भकत जनर।।'' इति्

शङ्करदेवस्य प्रयाणस्य वर्षद्वयात् परं सोन्दराया स्थिते भागीनेयस्य रामचरणठाकुरस्य गृहे उषित्वा माधवदेवेन 'भक्ति-रत्नावली'-ग्रन्थस्य अनूदितकार्यं सम्पादितम्। विष्णुपुरी संन्यासी



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

श्रीमद्भागवतग्रन्थस्य भक्तिमूलकान् श्लोकान् अनुसृत्य आहत्य १३ संख्यकेषु विभागेषु विभज्य मूलत: 'भक्ति-रत्नावली' ग्रन्थं विरचितवान् आसीत्। भागवतादतिरिच्य द्वित्रान् श्लोकान् 'हरिभक्ति-सुधोदय' इति ग्रन्थात् उद्धृतवान् आसीत्, अन्या: द्वित्रा: श्लोकाश्च स्वकीया: अस्मिन् 'भक्तिरत्नावली' ग्रन्थे अन्तर्भूता: श्लोका:- ११५ सङ्ख्यका:। एतेषु १११ श्लोका: मूलभागवतग्रन्थात् स्वीकृता:, स्वकीयाश्च ४ सङ्ख्यका: स्युरिति। माधवदेवेन आहत्य २१४ सङ्ख्यकै: पद्यै: स्वग्रन्थ: सम्पूर्ण: कृतो वर्तते।

माधवदेव: शङ्करदेवस्य सान्निध्ये आगमनान्तरम् एकनिष्ठतया धर्मचर्चायाम् आत्मनियोजनं कृतवान्। अनन्तरं कोचराज्ञ: कामरूपम् आगत्य 'गनककुछि' इति स्थाने स्वकीयं गृहं निर्माय, तत्रैव उषित्वा शङ्करदेवेन सह धर्मचर्चायां निमग्न: जात:। तत्पश्चात् कानिचन दिनानि यावत् ताभ्यां तीर्थस्थानम् आटितम्।

अन्ते १५९६ ख्रिष्टाब्दे भाद्रमासस्य शुक्लद्वितीयातिथौ सप्तोत्तरशते वयसि महापुरुष: माधवदेव: महाप्रयाणं कृतवान्। धन्यास्ते एतादृशा: सौभाग्यशालिन: महापुरुषा:, ये च सततं सुस्मरणीया: सन्ति इति। शम्।

## श्रीगणेशस्तव:

**पण्डित: व्रजकिशोरत्रिपाठी**

(१)

नगराजसुतासुत रम्यपुर
पृथुलोदर सुन्दर चन्द्रशिर।
शिवनन्दन चन्दनबिन्दुधर
प्रणमामि पदे तव बुद्धिकर।।

(२)

सितवेरवरं सितवस्त्रधरं
दृढपञ्चकरं पुलकर्णधरम्।
सुममाल्यगलं समदु:खदलं
स्मर सुन्दरमिन्दुरराजनुतम्।।

(३)

गजशुण्डयुतं गजगण्डयुतं
गजतुण्डयुतं गजमुण्डयुतम्।
मदवारियुतं मदमर्दरतं
स्मर सुन्दरमिन्दुरराजनुतम्।।

(४)

समपूज्यसुरं समपुण्यधरं
समजाड्यहरं समविघ्नहरम्।
भयशान्तिकरं जयदानकरं
स्मर सुन्दरमिन्दुरराजनुतम्।।

(५)

मतिमान्द्यपरं मतिभाण्डधरं
मतिवृद्धिकरं मतिशुद्धिकरम्।
गुणसिद्धिकरं गुणवृद्धिकरं
स्मर सुन्दरमिन्दुरराजनुतम्।।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

(६)
मुनिवृन्दविवन्दितरम्यतनुं
सुरसंचयसेवितपादयुगम्।
हरिशंकरपंकजपुत्रनतं
स्मर सुन्दरमिन्दुरराजनुतम्।।

(७)
गणरक्षणशिक्षणशक्तमतिं
गणनाथमनाथगणाधिपतिम्।
जनलालनपालनकर्मरतं
स्मर सुन्दरमिन्दुरराजनुतम्।।

(८)
शिशुरूपधरं शिशुतोषकरं
शुभनृत्यकरं शुभकृत्यकरम्।
जननीसुखदं धरणीहितदं
स्मर सुन्दरमिन्दुरराजनुतम्।।

(९)
जप शास्त्रकरं जप शस्त्रधरं
जप हस्तिमुखं जप वक्रमुखम्।
जप खर्वधनं जप गर्वदमं
स्मर सुन्दरमिन्दुरराजनुतम्।।

(१०)
भज पाशकरं भज पापपरं
भज सर्वसुखं भज सर्वशुभम्।
भज शम्भुसुतं व्रजकीर्त्तिरतं
स्मर सुन्दरमिन्दुरराजनुतम्।।

ब्रह्मपुरम्, ओड़िशा

# मम देश:

**कुमारी मायाविनी परिड़ा**

अस्माकं देशस्य नाम भारतवर्षम्। आकुमारी हिमाचलम् अस्य विशालता अस्ति, अस्य देशस्य प्राच्यां प्रतीच्याम्, अवाच्यां च वङ्गोपसागर:, आरवसागर:, भारत महासागरश्च वर्त्तन्ते। एभि: सागरै: हिमालयै: विभिन्ननदनदीभिश्च देशस्य नैसर्गिकी शोभा वर्द्धते। अस्मिन् देशे गङ्गा, यमुना, सरस्वत्यादय: पुण्यसलिला नद्य: प्रवहन्ति। आसां नदीमातृकाणां जलधाराभि: अयं देश: सुजलसुफल: शस्यश्यामल: च भवति।

देशेऽस्मिन् व्यासवाल्मीकि- कालिदास- चाणक्यादय: स्वस्व- काव्यकविताभि: भारतीयसंस्कृते: अमरत्वं निष्पादयन्ति स्म। भारतवर्षे बहूनितीर्थस्थानानिसन्ति। तानि भातवर्षं पवित्रीकुर्वन्ति। प्रतिवर्षं तीर्थयात्रिण: विभिन्नतीर्थक्षेत्राणि गत्वा स्वस्व- मानसिक- शान्तिम् अनुभवन्ति। अस्या: देशमातृकाया: वरपुत्रेण महात्मगान्धिना विश्वे सत्यअहिंसा मन्दाकिनीधारा प्रवाहिता अभवत्। स्वाधीनस्य भारतस्य प्रथम: प्रधानमन्त्री जवाहारलाल नेहेरु: बहुकार्यम् अकरोत्। ते भारतीयानां चिरस्मरणीया: भविष्यन्ति, अस्मद्देश एकाधारेण स्वाधीन- सार्वभौम- गणतन्त्रराष्ट्रं भवति। तत: अत्र विभिन्नभाषाभाषिण: विभिन्नधर्मावलम्बिनश्च परस्परं प्रति सहानुभूत्या एकत्र निवसन्ति। 'सर्वधर्म- समानत्वं' नीतिं भारतवासिन: स्वागतं कुर्वन्ति। तस्य 'पञ्चशीलनीति:' जगति नूतनम् आलोकम् अददात्। अत: ममदेश: सर्वेषामपि अतीव प्रियतम: भवति।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# सीमान्तगान्धी

रवि शतपथी

सीमान्तगान्धी खाँ अवदुल गफुर खाँ आफगानिस्थानस्य जलालावाद इति स्थाने जन्मलाभम् अकरोत्। पाकिस्थानस्य उत्तर-पश्चिम सीमान्त प्रदेश: तस्य कर्मक्षेत्रम् आसीत्। सीमान्त +अञ्चलस्य जनान् एकत्र कृत्वा स: महात्मागान्धिन: पट्टशिष्य: आसीत्। सीमान्तगान्धी इति स: प्रसिद्ध:। गान्धिन: परामर्शक्रमेण स: संपूर्ण: निरामिशाषी अभवत्।

स: भारतस्य, पाकिस्थानस्य आफगानिस्थानस्य च नेता आसीत्। स: भारतस्य स्वाधीनता संग्रामे सक्रियम् अंशम् अगृह्णात्। स: 'लालाकुर्त्ता' गोष्ठीं कृत्वा स्वाधीनता आन्दोलनम् अकरोत्। हिन्दुं मुसलमानं च अन्तरा सद्भावं रक्षितुं कार्यम् अकरोत्। स: भारतस्य विभाजनेन स: दारुणम् आघातम् अलभत। स: खुदात्रखिजिमत्गार: इति गण+आन्दोलन् कृत्वा साधारण जनताया: अधिकारं प्रतिष्ठापितवान्।

आन्तर्जातिक सद्वोधनार्थं स: जवाहारलाल नाहेरु पुरस्कारम् अलभत्। स: 'भारतरत्नम्' उपाधिम् अपि प्राप्तवान्। पाकतुन: नेता वाद्शाह खाँ १९८८ तमे वर्षे पेशवारे मृत्युवरणम् अकरोत्। तस्य मरशरीरं ससम्मानं जन्मस्थाने जलालावादे कवरम् प्राप्तम्। तस्य वियोगेन भारते, पाकिस्थाने, आफगानिस्थाने च शोकस्य छाया आसीत्। सर्वे यदि गान्धि-सीमान्तगान्धि-दर्शित मार्गेण चलष्यिन्ति, तर्हि सद्भावना सुसम्पर्क वृद्धि: भविष्यति।

# नम: शिवाय

प्रीतिनन्दा

शिव: मङ्गलमय:, देवदेव:, अलक्ष्यजन्मा। तस्य पितृवंश-सृष्टि-परिचय: अगोचर:। वेदपुराणशास्त्र- लोककथासु शिवस्य महिमा अतिवर्ण्णित:। तस्य चरित्रं विचित्रं, शिव: शान्त: कुनश्च उन्मत्त:। कुत्र शिव: सत्यसुन्दर: पुन: कुत्र भूतप्रेतपिशाचगणेन सह ताण्डवनृत्यरत:। वस्तुत: शिवस्य प्रीकवाद: भारतीय प्रतीकवाद:। शिवोपासनामध्ये वैज्ञानिकरहस्यम् अस्ति। शिवलिङ्ग-उपरि विल्वपत्र- कदली- क्षीर- गङ्गा- केतकीपुष्प- शर्करा- प्रभृतिघर्षणद्वारा सर्वरोगहरं रसायनम् आविर्भवति। तत् सेवनमात्रेण भक्त: सर्वरोग- सर्ववाधाविपत्तिमुक्त: भवति। शिवस्य श्रेष्ठपर्व-शिवरात्रिदिने रात्रिजागरणम् अग्निसेवनं मूर्च्छ-अपस्मार-कुष्ठादि- नाशनहेतु: भवति। विशेषत: शिवपरिवारकल्पना अखिलसाम्यवादस्य सूचनां ददाति। शिव: भारतस्य महादेव:, भातरसदृशं-तस्य ऐतिह्यरहस्यं क: ज्ञातुं न पारयति। शिवस्य वासस्थानं श्मशानं, तत्र सर्वे समाना:। शिव:



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

देवदेव:, पत्नी पर्वतरापुत्री हैमवती, सेनानी: मयूरवाहन: कार्त्तिकेय:, विद्याबुद्धिदाता गणेश: मूषिकवाहन: गजवदन: पुत्रद्वयम्। शिवस्य वाहनं वृषभ: पत्ना: वाहनं सिंह:। परिवारे भूतप्रेतपिशाच, ऋषिमुनि-सिद्धसांधक भक्तसम्मेलनम्। परस्परं शत्रुतापूर्णपरिवेशे अपि अखण्डसंहति: विराजमाना भवति। अत: भारतीयसंहति: शिवपरिवारसदृशी भवतु।

## श्रीशिवानन्दाष्टकम्

**डॉ. कालीप्रसन्न शतपथी**

तुहिन गिरिसुताया: पुण्यतीरे वसन्तं
निखिलजनहितार्थं मन्त्रराजं जपन्तम्।
अतुलितसुखचित्तं शान्तमत्यन्तकान्तम्
अभयवरदहस्तं श्री शिवानन्दमीड़े।१।

कुमति तिमिर भानुं सच्चिदानन्द चन्द्रं
दुरिततति‌कृशानुं सान्त्वनागन्धवाहम्।
सकल विबुध वन्धं वेदशास्त्रप्रमोदं
विधिहरिहररूपं श्री शिवानन्दमीड़े।२।

सकरुणमभिरामं कर्णधारं महान्तं
यतिवरमतिपूज्यं योगवेदान्तसिद्धम्।
प्रणतमनुजपीड़ाहारकं वैद्यराजं
प्रकटितमहिमानं श्री शिवानन्दमीड़े।३।

सरलतरलवृत्तं भक्तिमाधुर्यसिक्तं
विषमविषयमुक्तं हृद्यतारुण्य दीप्तम्।
कलिकलुषकृतान्तं सत्यधर्मानुरक्तं
विमलचरितवन्तं श्री शिवानन्दमीड़े।४।

निरलसकृतितुष्टं साधकेन्द्रं वरिष्ठं
भवभयहरमिष्टं ज्ञानवैराग्यनिष्ठम्।
शिवदमतिविशिष्टं शिष्टमैश्वर्यपुष्टं
श्रितबहुमतजुष्टं श्री शिवानन्दमीड़े।५।

सुरुचिरतनुकान्तिं विश्वकल्याणशक्तिं
सुविदितशुभकीर्त्तिं दिव्यचैतन्यमूर्त्तिम्।
भजनमधुपिबन्तं दिव्यसन्देशमत्तं
गुणरहितमनन्तं श्री शिवानन्दमीड़े।६।

ललितमधुरभाषं भक्तहृत्पद्मवासं
दलितजनसहायं भव्यमाकर्षणीयम्।
निगमपथविलासं शास्त्रतत्त्वप्रकाशं
शरणदमघनाशं श्री शिवानन्दमीड़े।७।

अविरतहितचितं स्त्रिग्धसौहार्द्यसिक्तं
परमपुरुषमाद्यं धर्मनिष्पक्षवन्द्यम्।
त्रिभुवनागुरुवर्यं योगिनामग्रपूज्यं
जगदवनसुदक्षं श्री शिवानन्दमीड़े।८।

**शिवानन्दाष्टकं पुण्यं शिवानन्दप्रदायकम्।**
**शिवानन्दप्रसादेन शिवानन्दमयं जगत्।।९।।**

- ० -



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# राजधान्या उपकण्ठे

**श्रीमती संघमित्रा नायक:**

राजधान्या उपकण्ठे
भग्नपर्णकुटीरे
ग्रामस्य अकर्मण्या: बृद्धबृद्धाश्च
विनाहारं कर्मरता:
नग्न-शिशु-शरीरे वातपित्तज्वर:
नास्ति वस्त्रमपि आच्छादयितुं शरीरं
विनाहारं त्रीणि दिनानि गतानि
सुमिष्ट-खाद्यस्य कुतो वा प्रश्न:
तन्वी गृहिणी पुन: मिथ्याभिमाने भग्नस्वास्थ्या
सप्तस्तमितं वस्त्रं किं तस्या यौवनावरकम्?
अम्वाङ्के रुग्णशिशु: रोदिति
औषधं विना हा ! शिशु: मरिष्यति
सर्वकारविज्ञापनम् विनामूल्येन भेषजम्
वितर सर्वेभ्य: समदृष्ट्या
कथं तस्या: शिशु: न लप्स्यते सुविधाम्?
आभिजात्य-प्रदर्शनिन को वा लाभ: वर्तते
गतस्य शोचना नास्ति
अद्य ये राजेन्द्रासने
श्व: ते पथचारिण:
इह चक्रवत् परिवर्तन्ते दु:खानि च सुखानि च
धनिन: मानिन: अमात्या-अमला:
रात्रौ य: व्यभिचारी
सूर्यालोके तस्य मुखे हरिनाम
धनिनाम् अयं सौखिकसम्भोग:
नास्ति तत्र समाजशृङ्खला
शुक्लाम्बरधरा: सर्वे
वस्त्रेण सभ्या: मनसा तु नग्ना:
महाकाल- फलमिव हृदयं तेषाम्
जीविकापि गुप्तवाणिज्यम्
पुनरपि तेन निर्मिता:
राजधान्याम् उच्चोच्चप्रासादा:
परम् राजधान्या उपकण्ठे
भग्नपर्णकुटीरे.....

# संस्कृतं कथं पठनीयम्

**कुमारी चन्दना मुखार्जी**

संस्कृतभाषा सर्वासां भाषाणां जननी अस्ति। अस्मिन् भूतले या: भाषा: प्रचलिता: सन्ति ता: संस्कृतभाषाया: जायन्ते। इयं संस्कृतभाषा प्राचीनतमा अस्ति। अस्या: भाषाया: प्रयोग: विशेषरूपेण अस्माकम् देशे भारतवर्षे भवति।

अस्माकं भारतीयानां संस्कृति: संस्कृतभाषायामेव उल्लिखिता अस्ति। कीदृशी भारतीय-संस्कृति: ? अस्या: आकृति का: ? अस्या: रक्षणोपाय: क: ? इति एतेषां प्रश्नानां समाधानं अस्यां संस्कृतभाषयामेव कृतम् अस्ति। भारतीय- संस्कृते: रूपं वेदेषु निरूपितम् अस्ति। चतुर्णां वेदानां अध्ययनानन्तरं वयं भारतीय-संस्कृतिं ज्ञातुं समर्था: भवाम:। चत्वार: वेदा: संस्कृतभाषायामेव लिखिता: सन्ति।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

भारतवर्षस्य प्राचीनतमः इतिहासः पुराणेषु उल्लिखितः अस्ति। अस्माकं भारते अष्टादश पुराणानि उपपुराणानि च सन्ति। सर्वाणि पुराणानि संस्कृत-भाषया लिखितानि सन्ति। संस्कृतभाषा श्रेष्ठा। अतः संस्कृतं पठनीयम्।

**"संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः,**
**संस्कृते सकलं ज्ञानं संस्कृते किं न वर्त्तते।"**

**वार्त्ता वृत्ति-नियुक्तिनिमित्तं-**

## संस्कृतम् अनिवार्यं भवतु

**आरक्षी महानिर्देशकः श्रीयुक्त महापात्र**

कटकम्-१०.८.९५- विश्वसंस्कृतदिवस-समारोहे माध्यमिकविद्यालयात् स्नातकं यावत् संस्कृतम् अनिवार्यं भविष्यति चेत् भारतवर्षे एक्यप्रतिष्ठा सम्भवेत् इति बहुविशिष्टविद्वांसः स्वभाषणप्रसङ्गे सूचितवन्तः।

लोकभाषाप्रचारसमितिपक्षतः स्थानीय-सेकण्डारी बोर्ड विद्यालयपरिसरे संस्कृतदिवसोत्सवः परिपालितः, मुख्यातिथिः आरक्षी महानिर्देशकः श्री रविनारायण महापात्र स्नातकपाठ्यक्रमे संस्कृतम् अनिवार्यं कारयितुं सूचितवान्। सम्मानितातिथिः श्री जगन्नाथ-संस्कृतविश्वविद्यालयस्य लब्धावसरः कुलपतिः प्रफेसर वटकृष्ण महान्ति संस्कृतभाषा प्रतिजनसमीपं नेतव्या इति कथितवान्। मुख्यवक्ता ओड़िशाा उच्चन्यायालयस्य वरिष्ठः अधिवक्ता संस्कृतेन भाषणं प्रदाय स्वामिविवेकानन्दस्य आदर्शेन अनुप्राणिताः सन्तः वयं संस्कृते निहितज्ञानविज्ञानस्य तत्त्वं समग्रविश्वे प्रचारयितुं कटिवद्धाः भवेम इति घोषितवन्तः।

श्री कृष्णचन्द्र नन्दः, श्री कल्याण महापात्रः, श्री वसन्त कुमार दास, पण्डित सुरेन्द्र नाथ आचार्यः, डॉ. विपिन विहारी शतपथी, श्रीमान् नीरद आर्यः प्रमुखाः उदवोधनं दत्तवन्तः। डॉ. कालीप्रसन्न शतपथी स्वागतं व्याहृतवान्, श्री विष्णुचरण जेना अध्यक्षतां कृतवान् आसीत्।

अनुष्ठित-संस्कृत-भाषण-श्लोकावृत्तिप्रतियोगिता-कार्यक्रमे विचारकत्वेन अध्यापिका मनोरमा आचार्यः, श्री मलय लाल् गांगुली, श्री गणेश्वरपरिडा, अध्यापिका श्रीमती क्षणप्रभा नन्दः, श्रीमती सत्यप्रिया दाशः, अध्यापकः धूल वारिक, पण्डित सुरेन्द्र नाथ आचार्य, पण्डित पूर्णेन्दु त्रिपाठी प्रमुखाः योगदानं कृतवन्तः।

छात्राः संस्कृतलोकनृत्यं परिवेषितवत्यः, श्री नलिनीकान्त पढिहारी धन्यवादमर्पितवान्।

कृतिप्रतियोगिनः सामितिपक्षतः पुरस्कारैः पुरस्कृताः।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# ईश्वरबोधे नैराश्यम् (२)

**लिपिकार:- आनन्द भरद्वाज:**

**भाषान्तरम्- डॉ. विपिन विहारी शतपथी**

केनापि भणितम्, स: अजेय: अब्यक्त:, अनिर्वचनीय:, अरूप:। पुन: ये भूतवादिन:, ते स्वस्य उपास्यभूतम् ईश्वर इति प्रतिपादयन्ति। यथा अग्नि-उपासका: अग्निम्, सूर्योपासका: सूर्यम्, आकशवादिन: आकाशम् ईश्वर इति कथयन्ति। मूर्त्ति- उपासकेषु शैव- शाक्त-गाणपत्यादय: स्वस्य उपासनाया: कल्पितमूर्त्तिगणं ईश्वररूपेण स्वीकुर्वन्ति। अवतारवादस्य प्रचलनात् अनन्तरं, ये राम-कृष्णयो: वा उपासनारता: जाता:, ते तान् ईश्वर इति कथितवन्त:, अस्य अवतारवादस्य छाया धर्मे प्रविश्य, कालक्रमेण संप्रदायप्रतिष्ठापका: धर्मप्रवर्त्तका: च ईश्वररूपेण पूजिता: जाता:, यथा–यीशु, महम्मद:, महावीर:, बुद्धश्च।

अयम् अनिर्देश्य-पुरुषविशेष: ईश्वरवाद: कालक्रमेण अस्मिन् आधुनिकयुगे पुनरपि अधिक- पुरुषविषेशत्वं लभते, आस्थानप्रयुक्त: सन् बहु-आधिक्यं प्राप्य अविश्वासविषय: जात:।

गुरुवाद: धर्मराज्ये स्वस्य आसनम् एतादृ:शं सुहृढं कारितम् यत्-

**"गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवो महेश्वर:**
**गुरु: साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नम:"**

अत्र ख्यातिसम्पन्ना: गुरव: तेषां शिष्याणां भक्तानां च हृदयं ईश्वरत्वेन अधिकृता:, अवतारवादेन सह आत्मानं प्रतिष्ठितं कारयितुं चेष्टन्ते। पुन: कतिपयेषु संप्रदायेषु तस्य शिष्या: गुरो: मूर्त्तिम् उपासनाया: ध्यानीय स्वरूपभावेन ग्रहीतुम् उपदेशं प्रदत्तवन्त:। पुन: कतिपया: गुरव: आत्मानं प्रकाश्ये ईश्वर इति प्रचारयितुं लेशमात्रं कुण्ठिता: न भवन्ति।

स्वत: प्रश्न: आयाति, सृष्टौ किं शत संख्यका: ईश्वरा: सन्ति? तस्य निर्माणं किं नरेण? मानव: प्रतिष्ठापयति। अथवा स: मानवं जीवजन्तुं सृष्टिं च सृजति? किम् ईश्वर: पाप-ताप-कामनामय- जीवत्वजर्जरित एक: मानव: भवेत्? मातृगर्भात् भूमिष्ठ: सन् य: मानव:, बाल्यं-यौवनं-जरां च उपभुज्य, रोगशोकानाम् आवर्त्तनेन मृत्युमुखे पतति, स: किं ईश्वर: भवेत्?

एते प्रश्ना:, ईश्वरवादस्वरूपनिरूपणाय यं कमपि जिज्ञासुं हतोत्साहितं कुर्वन्ति।

यस्मिन् कस्मिन व्यक्तिविशेषे भूते मूर्त्तिप्रसङ्गे ईश्वरत्वस्य आरोपविषये अतीतयुगस्य धर्ममन्तव्यस्य दर्शनेन ज्ञायते यत् वेदस्य प्रवृत्तिमार्गे दृश्यमान-अग्नि-यज्ञ-सूर्यादिषु ब्रह्मत्वम् आरोपितम् अपर-उपासना-प्रवर्त्तक-शास्त्रै: तेषाम्, उपास्यदेवेषु ईश्वरत्वम् आरोपितम्। त्रेतायुगस्य वशिष्ठ-वाल्मिकी-प्रभृतिभि: कविभि: रामे ईश्वरत्वं सीतायाम् ईश्वरतम् आरोपितम्। द्वापरयुगे



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

व्यासदेवः कृष्णेऽपि ईश्वरत्वम् आरोपितवान्, ततः कालक्रमेण एषः बोधः बृद्धिं प्राप्य मानवसमाजे ईश्वरबाहुल्यं तेन-गतानुगतिकेन जातम्।

ततः एषः ईश्वरवादः मानववोधं प्रति कदा प्रविष्टवान्? तदेव विचारणीयम्। पुनः तत् एतादृशम् अनिर्देश्यस्वरूपं गृहीत्वा येन यथा पुनः यस्मिन् ईश्वरत्वम् आरोप्यते, सः तम् ईश्वर इति वक्तुं शक्नोति, अस्य मूलतत्त्वं किं भवेत्, एषः अवधानस्य विषयः।

## शिशो हासः

**डा. प्रभातरञ्जनमहापात्रः**

संसारे यावन्तः प्राणिनः सन्ति सर्वे स्वाभाविकमानन्दं प्राप्तुमिच्छन्ति। आनन्दः नाम सुखम्। स्वानुकूलवेदनीयं सुखमिति दार्शनिकानामभ्युपगमः। सांसारिकविषयसंपर्कात् अभिलषितपदार्थलाभादवा यादृश आनन्दो लभ्यते, सः क्षणस्थायी भवति। स निर्दिष्टे समये आविर्भवति, विषयसंपर्क कालपर्यन्तं तिष्ठति, कालान्तरे तिरोभवति। तदनन्तरं दुःखं वर्द्धते। विषादभावः हृदयं ग्रसते। दुःखं तु आगन्तुकं नात्मनः स्वभावः। चिरन्तनआनन्दस्तु आत्मनः स्वभाव एव। स्वभावभूतोऽप्यानन्दः कदाचित् प्रतिबन्ध-कैरभिभूयते। स्वाभाविकतां प्रकाशयितुं न क्षमते। साऽवस्तितिरज्ञानापूर्विकां। सर्वेषां प्राणिनामेवं भूता स्थितिरस्त्येव प्रायशः। परन्तु मनुष्यस्येदृशी अवस्था स्पष्टं प्रकाशते, इतरेषां प्राणिनां तु न तथा। प्राणिमनोविज्ञानाभिज्ञाः अनुसन्धानबलेन इतरप्राणिनां मनोवृत्तिं ज्ञातुं शक्नुवन्ति। मनुष्य तदितरयोः प्राणिनोः इदमेव पार्थक्यम् यत् मनुष्य स्वकीयां भावनामवस्थितिं वा वाचा प्रकाशयितुं क्षमते। इतरप्राणी तु केवलं भावभङ्ग्या प्रकाशयति। तद् प्रकाशनमपि अस्पष्टम्। प्रसङ्गेऽस्मिन् मानवशिशोः अवस्थितिः पर्यालोचनीया। मानवशिशुः यत् किंचित् वदति, तदपि अस्पष्टमेव। शिशुमनोवैज्ञानिकाः तत् स्पष्टमनु-भवन्ति। शिशोः माताऽपि तस्य भावं जानाति। शिशुः यदि अपूर्णमनोरथो भवति तर्हि क्रन्दति, क्रन्दनेन स्वकीयामपूर्णतां प्रकाशयति, अभिलषितवस्तुप्राप्त्यर्थं पार्श्ववर्तिनमावेदयति। वस्तुतः शिशुः आनन्दस्वभावः। तस्य आनन्दमयी स्थितिः स्वाभाविकी निर्मला च। शिशुः कोमलशरीरः निर्मलहृदयश्च। सः यदनुभवति सर्वं सर्वत्र अनायासेन प्रकाशयति, स्वपरविचारं न गणयति। संसारस्य व्यावहारिकनियमजातं मत्वा न चलति। सरलता तस्य स्वभावः। सः समदर्शी। कदाचित् अग्निमपि स्पृशति। गभीरजलराशौ प्रवेष्टु-मिच्छति। सर्पेण साकमपि खेलितुमिच्छति।

हिताहितविचारशक्तिविहीनस्यापि शिशोः वचनं वयोबृद्धानां मनोराज्यमान्दोलयति, आनन्दयति। शिशुदर्शनेन, तन्मुखनिः-सृतवचनश्रवणेन च समुल्लसति सर्वेषां हृदयम्। निजपरभाव-विहीनस्वभावं शिशुं क्रोडे धारयितुं कस्य सहृदयस्य मनः न समुत्सहते?



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

शिशुः साक्षात् परमात्मनः प्रतिमूर्त्तिः। यदा परमात्मा लोककल्याणार्थं धरातलेऽवतरति, तदानीं शिशुरूपेण लीलां विधाय भक्तजनमानसं हरति, आनन्दयति, दुःखान् मोचयति। शिशुरूपेण परमात्मनोऽवतारः लोके सुखाय भवति। शिशोः निष्कपटतापूर्णः हासः परमानन्दमुत्पादयति। कामक्रोधलोभमोहादिग्रस्तस्य वर्षीयसः मनुष्यस्य हासस्तु तथैव आनन्दप्रदो नैव भवति। बालमुकुन्दस्य आनन्दमधुररूपराशिं विलोक्य भक्तः गायति।

**करारविन्देन पदारविन्दम् मुखारविन्दे विनिवेशयन्तम्**
**वटस्य पत्रस्य पुटे शायानं बालं मुकुन्दं मनसा स्मरामि।**

वरिष्ठप्राध्यापकः स्नातकोत्तर- अद्वैतवेदान्तविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी

## मम ग्रामः

**श्री गुरुप्रसाद रथः**

नवस्थापितमतिविख्यातं जगत्सिंहपुरमण्डलम्,
शिक्षाप्राणकेन्द्रं करोति उत्कलम् उज्ज्वलम्।१।
मण्डलमध्यस्थशासनं वरदा मध्यशासनं तत् नाम,
सर्वदा च वरदायकः भवति अति प्रियः मम ग्रामः।२।
पञ्चशतं जनाः निवसन्ति तत्र सर्वे एव सुशिक्षिताः
ग्रामप्राणदात्री काठयोड़ि नदीनिकटे च प्रवाहिता।३।
प्रभुः महावीरः पवनकुमारः ग्रामस्य प्रत्यक्षदेवः
दरिद्रभक्तस्य भवति बान्धवः माता पिता महोदवः।४।
प्राथमिक विद्यालयः पुनः उच्च विद्यालयः तत्र
चिकित्सा- निमित्तं ग्रामजनाः सर्वे न गच्छन्ति च अन्यत्र।५।
केचन कृषकाः निवसन्ति तत्र केचन उद्योगिजनाः
सर्वे तु एकत्र सुखेन चलन्ति नैव कोऽपि हीनमनाः।६।
सर्वे न जानन्ति संस्कृतविषये केचन जानन्ति तथा।
अतः पाठयामि सर्वदा संस्कृतं प्रतिज्ञा मम अव्यर्था।७।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# रोचते

**पण्डित वेणुधर परिडा, कोरापुटम्**

सरस सरसीतीरम्।
विमलशीतलनीरम्।।
कोमलकमलवास:।
मुदितकुमुदहास:।।
चपल- चन्द्रिका- धारा।
चटुल तरलतारा ।।
कलकोकिल काकलि:।
मधुरमधुप केलि:।।
मेदुरमुदिरच्छाया।
पावन पवन माया।।
ललित लतिका कुञ्जम्।
शोभनसुमन: पुञ्जम्।।
सत्यसनातननीति:।
समता ममता प्रीति:।।
रोचते मे निरन्तरम्।
वितरति सुधाधारम्।।

# अनु सन्धित्सु:

**अध्यापिका अमिता त्रिपाठी**

श्रुतं मया तव नाम चतुर्भिरक्षरै:
रटामि स्म प्राणान् त्यक्त्वा
रामनाम रटयन् वाध्य: शुकपक्षीव
अति गुप्ते मनस: निभृतप्रकोष्ठे
जीवनस्य गतिपथे अग्रेसरे सति
एकत: शतं नाम जानामि स्म तदा
तत् पुन: सर्वम् एकम्, एकत: अनेकम्,
रूपं तव स्वरूपत: अरूपमजानम्
यत् पुन: एकस्वरे ॐकारे निहितम्
मनस: अन्तराले एकाग्रचितेन
कल्पनाया: लेखन्या:
अधुनाऽपि रंजयामि रूपं तव
अरूपत: स्वरूपं एकान्तरूपेण चित्ते मम जागर्त्ति कम्पनम्
प्राणेषु मे भवति पुलकम्
तव सत्ताया: अनुभवेच्छया।।

डा.हरेकृष्णमहताव आदर्शसंस्कृतमहाविद्यालय:, कटकम्



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# ईश्वरबोधे नैराश्यम् (४)

**लिपिकार:- आनन्द भरद्वाज:**

**भाषान्तरम्- डॉ. विपिन विहारी शतपथी**

मनो: परिदृष्टराजयोगदर्शने पूर्वप्रचतिलसनातन + आत्मन: धर्मराज्ये यादृक् सार्वभौमत्वं स्वीक्रियते, पुरुषविशेष + ईश्वरवादस्यापि तादृक् सार्वभौमत्वं स्वीक्रियते। तत: योगदर्शनसमाजस्य प्रतिष्ठाया: परं आत्मा पुरुषविषेश + ईश्वरश्च धर्मराज्ये यौथसार्वभौमत्वं द्वैतराजत्वं वा कुरुत:। एतत् अप्रतिद्वन्द्व-मन्तव्यरूपेण प्रतियुगं धर्मराज्ये पालितं भवति।

त्रेतायुगस्य धर्मत: कविवशिष्ठवाल्मीकि-प्रभृतय: न भिन्ना: जाता:। आत्मन: ईश्वरत्वं स्वीकुर्वन्ति पुन: रामम् ईश्वर इति प्रतिष्ठापयितुं न पश्चात्पदा:।

द्वापरयुगे व्यासदेव: धर्मराज्ये एक: युगस्रष्टृत्वेन स्वीकरणेन अत्युक्ति: न भवेत्, तथापि स: राजयोगस्य आदर्शेन अनुप्राणित: सन् धर्मराज्ये आत्मा वहिर्भूमिक + ईश्वरश्च, एनं द्वैतप्रभुत्वस्य मन्तव्यं धारयति, कृष्णस्य विश्वरूपदर्शने तं स्पष्टाक्षरेण ''सनातनस्त्वं पुरुषो मतो मे'' त्वं सनातनधर्मस्य प्रतिपाद्यपुरुष इति कथितवान् पुन:

**''यदा यदा हि धर्मस्य ग्लानिर्भवति भारत**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।''**

कथयित्वा, अवतारवादस्य स्वीकृतिं प्रदाय, तस्यां गीतायां वहुधा कृष्णम् ईश्वरत्वेन प्रतिष्ठापयति, पुन: अपरपक्षे ''**ईश्वर: सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति**'', हे अर्जुन! ईश्वर: सर्वप्राणिनां हृदये निवसति, पुन: ''**अहमात्मा गुडाकेश सर्व भूताशय स्थित:**''। हे अर्जुन! अहमात्मा सर्वेषां प्राणिनां हृदये तिष्ठामि, पुनरपि ''**अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामवुद्धय:**'', अहम् अव्यक्त:, व्यक्तिरूपेण जन्मग्रहणं करोमि इति मां बुद्धिहीना: जना: वदन्ति, इति प्रोक्तवान्। अत्र, ईश्वर: बहिर्भूमिक: न भूत्वा प्राणिनाम् अन्तर्निहित आत्मा इति प्रतिपादित: जात:।

व्यासात् परमपि धर्मराज्ये, आत्मत: ईश्वरत्वं बहिर्भूमिकपुरुषविशेषस्य ईश्वरत्वम् उभयमेव धार्मिकगोष्ठि मन: जनसाधारणचेतनाम् आक्रान्तं कृत्वा तिष्ठत:। प्रत्येकजन: धर्मसम्वन्धे द्वैधचिन्तां गृह्णाति, प्रत्येकजन: चिन्तयति, आत्मा मयि, पापकरणेन नरकं गमिष्यामि, पुण्यकरणेन स्वर्गं गमिष्यामि, अहं यत् करिष्यामि मम कृते तत् भविष्यति, मम कृते अहं स्वयं न करिष्यामि चेत् अपर: न कोऽपि किमपि न करिष्यति। अहम् उत्तमं मन्दं वा यथा कार्यं करोमि करिष्यामि च तस्य फलं लभे प्राप्स्यामि च । एनं यथा चिन्तयामि, अपरपक्षे कथयामि; ईश्वर: एक: अस्ति, स: सृष्टिकर्त्ता, स: यत् करोति यत् करिष्यति वा तत् भविष्यति, अहं किंवा करिष्यामि? मनुष्यस्य



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

मनः एतादृशदोदुल्यमानावस्थायां स्थितत्वात्, आत्मज्ञानं पुरुषकारः आत्मघटनोद्योगः नरात् अपसरितं भवति। मानवसमाजे एषः बहिर्भूमिक पुरुषविशेष ईश्वरवादः प्रविश्य दृढमूलः भवति, यदा मनुष्यस्य मनसि धारणा जाता यत् ''त्वं पापं पुण्यं यत् करिष्यसि कुरु, अहं त्वां तस्मात् परित्राणं करिष्यामि'' यथा-

**''सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच।।''**

अत्र विशेषानुध्यानस्य विषयः एकं पदं ''सर्वधर्मान् परित्यज्य'' सर्वधर्मं परित्यक्तुं अत्र निर्देशः प्रदत्तः। एषः साधारणधार्मिकजनं धर्मानुसन्धित्सातः अधिकतः अधिकः विरतं कृतवान्। यतः, यत् हृदि दृढधारणा भविष्यति यत्, मया यादृशपापकर्म कृते अपि ईश्वरः भगवान् कृष्णः वा मां सर्वपापेभ्यः मोक्षयिष्यति, तर्हि सः कथं वृथा परिश्रमं कृत्वा कः ईश्वरः? कः धर्मः? कः पुरुषकारः? एतेषाम् अनुसन्धानकर्मणि प्रयासी भविष्यति? फलतः एतादृशमन्तव्ये धर्मतत्त्वजिज्ञासासम्बन्धे च जनचेतना मूढा हतोत्साहिता च जाते।

## यदि

**डॉ. सत्यनारायण आचार्यः**

कथां यदि कथयितुं पशुः समर्थः!
मेघश्चेत् पथिकायते
कस्मिंश्चित् कुज्झटिकाधारे
स्फुटति कैरवं यदि शुष्कपर्वतशिखरे
निर्जीवः सजीवायते

कविलेखनी लपने
तर्हि वद बन्धो!
अद्य कथं वा किमर्थम्?
तन्मुखं न मुखरायते
संस्कृतनिर्झरे?

## मनोदाहः ???

**दास अभिमन्युः**

मनसि मे आशा जाता
दृष्ट्वा अपरस्य विवाहम्।
कर्त्तुमिच्छामि विवाहम्
न स्थास्यामि अविवाहितोऽहम्।।१।।

न सन्ति षड् ऋतवः,
अस्ति सप्तमे ऋतुः विवाहस्य।
अष्टमे कलहः ऋतुः,
नवमे पश्चात्तापश्च।।२।।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

अस्ति कीदृशः वैचित्र्यमयः,
ऋतुरयं विवाहाय
मनः पुलकितं भवतिः
नवीनागन्तुकायै ।।३।।
ओष्ठे लेपनार्थं रङ्गः
इच्छति च केशविन्यासाय।
भाषते दर्शय चलच्चित्रम्,
देहि सुवर्णं पट्टवस्त्रम् ।।४।।

किन्तु धनस्य आभावः
जायते सदा कलहः।
करिष्यामि चौर्यवृत्तिम्
भविष्यामि सन्यासी वा।।५।।
आयाति नवमः ऋतुः,
मनः ज्वलति पश्चात्तापेन।
भवेत् वा कः अयम्
विवाह मनोदाहः वा ???।।६।।

## चण्ड्यष्टकम्

**पण्डित दामोदरः**

प्रयाति यस्याः खलु नामकीर्त्तनात्
समस्तपापं लभते च सद्गतिम्।
विरजमानां कटके मनोरमे
नमामि चण्डीं मम मातरं मुहुः।।१।।
सदैव मन्दार- सरोजमण्डिता-
मसंख्यभक्तस्तुतपाद-पङ्कजाम्।
जगत् प्रसूति स्थितिनाशकारणं
नमामि चण्डीं मम मातरं मुहुः।।२।।
दशास्यनाशाय कुजेशवन्दितां
विलोलजिह्वां मनुजार्त्तिहारिणीम्।
निशुम्भ शुम्भा सुरमुण्डमालिनीं
नमामि चण्डीं मम मातरं मुहुः।।३।।
मुखप्रभानिन्दिततारकापतिं
स्मितद्विजालीरुचिरां महेश्वरीम्।
सदामहाभीतिहरां सुखप्रदां
नमामि चण्डीं मम मातरं मुहुः।।४।।
शिवा क्वणन्नूपुरकिङ्किणीधरां
प्रफुल्ल पङ्केरुहरम्यविग्रहाम्।
अनेकधारत्रकिरीट- शोभितां
नमामि चण्डीं मम मातरं मुहुः।।५।।
प्रचण्ड वैलोचनदैत्यनाशिनीं
त्रिशूलचक्राऽसिधनुर्गदाकराम्।
शुभङ्करीं भास्कर- कोटिऽभास्वरां
नमामि चण्डीं मम मातरं मुहुः।।६।।
कुमारलम्बोदरमातरं सतीं
मनोहरां ताण्डवनृत्यपण्डिताम्।
सुतादिदात्रीं पशुराजवाहनां
नमामि चण्डीं मम मातरं मुहुः।।७।।
वलाहकश्यामलकेश-धारिणीं
नवीननीलोत्पल-चञ्चलेक्षणाम्।
शुभां भवानीं करुणा- महोनिधिं
नमामि चण्डीं मम मातरं मुहुः।।८।।
दामोदरेण बिधेन मयैव कान्तं
चण्ड्यष्टकं विरचितं शिवयोः कृपातः।
वंशस्थ वृत्तमधिकृत्य नमस्यपित्रो
स्तुष्टा भवन्तु मनुजा! खलु तत् पठित्वा।।९।।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

# भद्रं करोति ईश्वर:

**पूर्णचन्द्र स्वाइँ**

अस्तगत: सूर्य:। क्षीणान्धकारं दूरीकर्तुं चन्द्र: उदित:। गृहाङ्गणे मण्डपस्य उपरि पितामह: उपस्थित:। एकस्मिन् पार्श्वे नप्ता शङ्कर:। अपरस्मिन् पार्श्वे नप्त्री माधवी। तौ अनुनयत:, पितामह! अद्य किमपि श्रावय ... ... ...। पितामह: दीर्घनि:श्वासं त्यक्त्वा किञ्चित् तमालपत्रसेवनं कृत्वा मन्दं मन्दं कथाम् आरभते। एकदा ... ... ...

एकस्मिन् ग्रामे रामगोविन्दौ इति बान्धवौ स्त:। उभयो: परममित्रता सर्वान् आनन्दयति। तयोर्मध्ये राम: आस्तिक: गोविन्दस्तु नास्तिक:। ईश्वरे तस्य विश्वास: नास्ति।

एकदा तौ उपविष्टौ उपलखण्डस्य उपरि। ग्रामपथ:। समय: सन्ध्या। परस्परं वार्त्तालापरत: सहसा मार्गस्य अपरपर्श्वे कोलाहल: श्रुत:। कियत्कालं यावत् तौ स्तब्धौ। अविचलित-भावेन च इतस्तत: अवलोकितौ। क्रमश: कर्णाकर्णिभावेन ज्ञातौ यत् गोविन्दस्य पुत्र: मृत:।

तत: तौ गृहमागतौ। दु:खाभिभूत: गोविन्द:। मुखे किमपि वचनं नास्ति। केवलं क्रन्दनम्। राम: प्राबोधयत् गोविन्दम्। मा क्रन्दतु।। य: गत: स: पुनरपि नागमिष्यति। मरणशील: मानव: ... ...। भद्रं करोति ईश्वर:। भद्रं कृतवान् यत् करिष्यति तदपि भद्रम्। गोविन्द: वदति- अरे! ईश्वर: भद्रम् अकरोत् मम। किमर्थं सर्वदा ईश्वर: इति वदति। तस्य वाक्यं श्रुत्वा विषण्ण: संजात: गोविन्द:। दिवसा: अतिवाहिता: ... ... ...।

अपर: दिवस:। कर्मरत: गोविन्द:। तस्मिन् कर्मणि तस्य अङ्गुली छिन्ना जाता। राम: उपस्थित:। सर्वं दृष्ट्वा पूर्ववत् वदति भद्रं करोति ईश्वर:। सहसा तस्य एतादृशं वचनं श्रुत्वा गोविन्द: क्रुद्ध: सन् प्रत्यवदत्- को भवान्? किं न मम मित्रम्। एवं वदति किमर्थम्? राम: उत्तरयति- भवतो परममित्रम् अहम्। अत्यन्तं रुष्ट: गोविन्द:। उभयोर्मध्ये महान् विभेद: सृष्ट:। मन्दं चिन्तितं गोविन्देन रामं प्रति। अस्य प्रतिशोध: नेतव्य:।

एकस्मिन् दिवसे तौ अरण्यमगच्छताम्। अरण्ये भ्रमणकाले एक: कूप: दृष्ट:। गोविन्द: कौशलेन तस्मिन् कूपे रामं पातितवान् ... ... प्रतिशोध: नीत: इति तस्य मनसि आनन्द:। अग्रे गच्छति एकाकी। कश्चित् कापालिक: तस्य पुरत: उपस्थित:। तस्य देव्या: कृते वलि: आवश्यक:। अत: स: गोविन्दम् आकृष्य देव्या: समीपं नीतवान्। सर्वा प्रस्तुति: जाता। सहसा गोविन्दस्य कण्ठ: रुद्ध:। मरणं सन्निकटम्। पलायितुमक्षम:। पूजावसरे कापालिकेन ज्ञातं। यत् तस्य अङ्गुली छिन्ना इति। कापालिक: कथयति- अरे ! देव्या: कृते अक्षतमानव: नितराम् आवश्यक:। अत: त्वं गच्छ ... ...।

मरणत: रक्षित: छिन्नाङ्गुल्या: निमित्तमिति मनसि आनन्दम् अनुभूतवान् गोविन्द:। तत: चिन्तयति। अरे! मया किं न कृतम्। रामस्य वचनम् अपरिहार्यम्। मया स: कूपे पातित:।



Scanned with OKEN Scanner

Please purchase PDFcamp Printer on http://www.verypdf.com/ to remove this watermark.

अक्षरशः तस्य वचनं सत्यम्। मूढोऽहम्। वस्तुतः "भद्रं करोति ईश्वरः"। यदि अङ्गुली छिन्ना न स्यात् तर्हि मरणं सुनिश्चितं स्यात्।

ततः सः त्वरया कूपस्य समीपं गत्वा रामस्य उद्धारं कृतवान्। सकलबृत्तान्तं कथयित्वा रामस्य निकटे क्षमा- प्रार्थनां कृतवान्। अद्यारभ्य सः परमास्तिकः एव। यथा पूर्वं तथा परं उभयोः मित्रता संजाता।

पितामहः कथायाः उपसंहारं कृत्वा समाधानच्छलेन कथयति-

"भद्रं करोति ईश्वरः यद्भूतं यद् भविष्यति।।
न केन क्रियते किञ्चित् स्रष्टा हि दुरतिक्रम्।।

## मृत्युः- आधुनिकतायाः रूपकल्पः

**श्री निरञ्जन पाढी**

**अनुवाद- डॉ. हरेकृष्ण शतपथी**

वीजस्य वा किं वाऽस्ति भावना
यदि फलं बृद्धायते
अथवा पक्वायते वा दुर्गन्धायते।
फलमहो अन्नमयं पिण्डम्
ग्रसति तत् कालः महाकालः
समस्तविभवस्तस्य रूपमपरूपम्
समस्तगरिमा तस्य सत्ता वा स्वरूपम्
सर्वमहो पक्षहीन-पक्षितुल्यं स्खलति निश्चितम्
स्खलनेन लुक्कायते
सर्वभक्षमृत्तिका वक्षसि
का वा सीमा फलस्यास्ति को वा परिसरः
आशायाः मीमांसा का वा,
आकाङ्क्षायाः व्याप्तिरस्ति
का वा?
तच्चुम्बक- आकर्षणशक्तिरथ का वा?
पुनरहो आकर्षणगभीरता कथा?
सर्वे; सर्वे किमु क्लान्तयात्रिगणाः
आकाङ्क्षायाः परीक्षार्थिवृन्दाः
अस्मिन्नहो दीर्घालस कङ्करितपये?
प्राक्तनं तत् देहमथ मनः
तस्य छाया पुरातनी पुरातनं पुनश्च यौवनम्
पुरातनः तस्य खेदः प्राक्तनश्च तदीयः सुस्वादः
पुरातनी क्लान्तिस्तस्य विभवः प्राक्तनः
कियान् क्लान्तः भविष्यति शङ्के स पथिकः
कियत्कालं तदेव च फलं
एवमेव तदीयामचञ्चलां स्थितिं
मुग्धकररङ्गद्वारा चञ्चलयिष्यति?
वीजस्य वा किंवाऽस्ति भावना?
तदेव एकं नूतन सम्भार-
मावाहनं नूतनस्वरस्य
इहकाल प्रतिनिधि जीवन्मृत्युरारशेः
कलाकारतुल्यवमहो, नूतनमनन्य-
रूपकल्पमाधुनिकतायाः।।



Scanned with OKEN Scanner